प्रकाशक—
अध्यक्ष,
साहित्य-संस्थान
राजस्थान विश्व विद्यापीठ, उदयपुर

मुद्रक—
व्यवस्थापक
विद्यापीठ प्रेस, उदयपुर

यो भेद । गच्छ आनन्द ! त वद— आवुस चुन्द । सम्मुखात् मया बुद्धस्य । सम्मुखाद् प्रतिगृहीतं— चुन्द ! लाभाय ते पिंडपातो महाफलविपाकायेती ।"

अथ आनन्दो बुद्धस्याज्ञा उपादाय तत्रोपसक्रम्य चुन्दम् अवोचत्—"सम्मुखात् मया बुद्धस्य श्रुत मया प्रतिगृहीत बुद्धोऽवोचत, लाभाय चुन्दस्य पिंडपातो महाफलविपाकाय। तत् किं निश्चित्य ? य च पिंडपात परिभुज्य बुद्धोऽनुतरा सम्यक्संबोधिं अभिसबुद्ध, य च परिभुज्य परिनिर्वाति, इमौ द्वौ पिंडपातौ समानृशसौ, अनयो न भेद —

चुन्दस्य भक्त भुक्त्वा हि तस्य गेहे मया श्रतम्।
आवाधा स्पृष्टवान् बुद्ध प्रवृद्धा मारणतिकाम् ॥४५॥ १८॥
भुक्तस्य च शूकरमार्दवेन व्याधि' प्रवृद्धा उदपादि शास्तु ।
विरेचन मानो भगवानवोचत् गच्छाम्यहं कुशीनारा नगरम् ॥४६॥ १६ ❋

अथ खलु भगवान् तदा उत्थाय आसनात् स्तोक च अग्रे गत्वा उपसक्र म्य एकस्मिन वृक्षमूले आनन्द अवोचत्।

"पृष्ठ में आनन्द ! आग्लायते, प्रज्ञापय निषीदनम् ।"

"एव"— इति प्रत्युवाच आनन्द शिघ्र च प्रज्ञापयामास निषीदन, तथागतो न्यषीदत्। आनन्दोऽपि अभिवाद्य बुद्धस्य पादौ एकमन्त न्यषीदत् ।

तस्मिन् समये पुल्कसौ मल्लपुत्रो[1] नाम आराडस्य श्रावक कुशीन पावाय मार्गं प्रतिपन्नो भवति। अपश्यन् स बुद्ध अन्यतरस्मिन् वृक्षमूले नि दृष्टवा च रोजो मल्ल शान्तेन्द्रिय अनुत्तर सवरचित महानाग इव सुपरिशुद्ध निर्मल सौमनस्यजातो बुद्ध समुपगम्य शिरसा बुद्धस्य पादौ अभिवाद्य एकम दत् अवाचच्च बुद्ध —

"आश्चर्यं भगवन् शान्तेन प्रव्रजीता सुखविहारेन विहरन्ति ! शटकसतानी पार्श्वतो गतानि नापश्यन् न चाश्रृणोत्। एकदा भन्ते ! अन्तरा च कुशीनगर अन्तराच पावा उभयोर्नगरयो मार्गे वृक्षमूले

❋ यह दोनो गाथाये पाली मे भी थोडे से भेद से मौजूद हैं।
[1] पाली में पुक्कस मल्लपुत्त नाम है।

महा परिनिर्वाण सूत्र

(राहुल साकृत्यायन)

[भारत के प्रसिद्ध और अन्तर्राष्ट्रीय ख्याति प्राप्त विद्वान महा पण्डित राहुल सांकृत्यायन ने प्रस्तुत पुस्तक 'महा परि निर्वाण सूत्र' एक साल पूर्व 'शोध-पत्रिका' में प्रकाशनार्थ भेजी थी, परतु उस समय इसका प्रकाशन नहीं किया जा सका और इसके साथ वाली दूसरी पुस्तक 'महावदान सूत्र प्रथम' का प्रकाशन कर दिया गया था। 'महा परिनिर्वाण सूत्र' और 'महावदान सूत्र प्रथम' को श्री राहुलजी ने चीनी भाषा से प्राप्त किया है। हजारों वर्षों पूर्व जिन ग्रन्थों की की रचना हमारे इस देश में की थी, काल के प्रवाह में अधिकांश खो गई और आज हमें हमारे ही ग्रन्थों को फिर से प्राप्त करने के लिये देश विदेशों की खाक छाननी पड़ती है।

महा पण्डित राहुलजी ने इस क्षेत्र में देश और साहित्य की अनुपम सेवा की है। चीनी भाषा से प्राप्त कर सस्कृत में इसका फिर से अनुवाद किया है। इसी प्रकार से अगर शोध-खोज की जाय और हमारी दृष्टि व्यापक रूप मे फैल जाय तो जिस प्रकार चीनी से यह पुस्तक खोजी गई है; उसी प्रकार मिश्र, यूनान आदि एशियायी देशों के अतिरिक्त योरोपीय देशों में भी हमारी प्राचीन साहित्यिक निधि प्राप्त हो सकती है।

प्रस्तु पुस्तक का 'शोध-पत्रिका' में तो प्रकाशन किया ही जारहा है परन्तु इसकी अलग से पुस्तक के रूप में भी कुछ प्रतियाँ निकाली जारही हैं। महा-पण्डित श्री राहुलजी इसके लिये अभिनन्दनीय है। —सम्पादक]

भारत की विशाल साहित्यिक निधिका एक काफी महत्वपूर्ण भाग मूल से लुप्त होकर अब चीनी और तिब्बती भाषा के अनुवादों में ही सुरक्षित है

उक, दु खेषु न दुर्मना, सुखेषु न सुमना, सहते सर्वं पृथिवीमिव। तस्मादुच्यते श्रमण इति।"

कुमारोऽवदत्–"साधु, अय मार्ग सत्य विषयेषु सम्यग् भयदर्शक, उत्तम प्रणीत परिशुद्धोऽकर्कश, अत्रास्ति आनन्द।" अथासौ आज्ञापयत् सारथिं

–"उपनय रथ तस्योपकठम्।"

तदा कुमार श्रमण अपृच्छत्—"अवहार्य श्मश्रकेशं, चीवरवसान आदाय पात्र क प्रार्थयसे??"

श्रमण प्रत्युवाच—"य प्रव्रजति गेहात् स इच्छति दमयितु चित्त चैतसिक, सदा विरत विषयरागात्, सर्वेषु सत्त्वेषु करुणाय मानोऽविहिंसमान, यन्नचित्त शात एव मार्गे भवति सावधान।"

कुमार उवाच—"साधु, अय परम सत्यमार्ग"

अथाज्ञापयत् सारथिं त्वरित (कुमार)

—आदाय ये महार्घं वस्त्रं रथ च प्रतिनीयाहि महाराजस्य (पार्श्वे)। अहं इदानीं अवहार्य श्मश्रुकेश, परिवास्य त्रिचीवर प्रव्रज्य अगाराद् अनुयु जे (च) मार्गम्। तत् किंविश्रित्य? इच्छामि दमयितु चित्तं चेतसिक परिहरामि दूरत विषय रजम्। परिशुद्धेन आत्मना वसत् पर्येष्ये मार्गवियाम्।"

तदा सारथि शीघ्रमगच्छत् पितु राज्ञ (समीपे) प्रत्यावर्तयितु कुमारस्य आरोहरणार्थं वस्त्र च। तत पश्चात् कुमारोऽवहार्य श्मश्रुकेश परिवास्य त्रिचीवर प्राव्रजत् अगारात्, अन्वयुंजत मार्गम्।

'बुद्ध उवाच– सचेत् भिक्षव? कुमारो दृष्ट्वा जीर्णं व्याधित पुरुषं, अज्ञासीद् '(अस्ति) लोके दु ख', दृष्ट्वा च मृतं पुरुष, (तस्य) लोके चित्तराग प्रश्रब्ध, दृष्ट्वा च श्रमण सर्वशो महाजागृतोऽवातरत् रथात्। तस्मिन काले पदे पदे तत्र सुखाभिभूत दूर (अतिपद) वचन, इदमस्ति सत्त्य गृहात् प्रव्रज्या, अस्ति सत्य निष्क्रमण।

अशृण्वन् देशे मनुष्या –"कुमारोऽवहार्य श्मश्रुकेश धर्म (पर) आच्छाद्य आदाय पात्र अगारात् प्रव्रजितोऽनुयुक्तो मार्गम् "सर्वेऽन्यमन्य अवदन्–" श्रद्धा

सांस्कृतिक इतिहास तथा विचारधारा को समझने के लिये यह जोड़नेवाली कड़ियाँ हैं। एक समय सैकड़ों वर्ष लगाकर भारतीयों और उनके चीनी या तिब्बती सहायकों ने लग कर-इस विशाल साहित्य को अनुवाद के रूप मे तैयार किया। समय जल्दी ही आयेगा, जब कि हमे अपनी इस साहित्य-निधि को फिरसे अनुवाद करके अपनी भारती भाषा में लाना होगा। चीनी भाषा मे भारतीय साहित्य का अनुवाद-कार्य ईसा की प्रथम शताब्दी मे क्या-ये मो-थङ् (काश्यपमातंग) के द्वारा आरम्भ हुआ और काश्यप ६७ ई० मे भारत से चीन पहुँचे थे। उस समय से जो अनुवादो का कार्य आरम्भ हुआ, वह १३ वीं शताब्दी के अन्त (मंगोल सम्राट् कुबिले खानके समय) तक चलता रहा। ६७-१३०० ई० तक जिन ग्रन्थो का अनुवाद हुआ था, उनमें से बहुत-से अब प्राप्य नहीं हैं, लेकिन अब भी साढे चौदहसौ ग्रन्थ मौजूद हैं, जिनको बत्तीस अक्षर के श्लोकों मे गिननेपर उनकी संख्या साढे तैंतीस लाख श्लोक या तीस-बत्तीस महाभारत के बराबर है। इन ग्रन्थो को सूत्र, विनय और अभिधर्म-पिटक के तीन भागों मे विभक्त किया गया है, यद्यपि पिटक के भीतर "बुद्धचरित" जैसे काव्यों को भी शामिल कर लिया गया है। तीनो पिटकों के ग्रन्थ महायान और हीनयान के भेद के अनुसार निम्न संख्या और परिमाण मे है—

षडायतनप्रत्ययात् स्पर्शः, स्पर्शप्रत्ययात् वेदना, वेदनाप्रत्ययात् तृष्णा, तृष्णाप्रत्ययाद् उपादानं, उपादानप्रत्ययाद् भवः, भवप्रत्ययाद् जातिः, जातिप्रत्ययाद् जराव्याधि-मरणशोक-परिदेव दु'ख दौर्मनस्यम्, इद केवलं दु खस्कन्ध., ज ातिप्रत्ययाच्च भव'–अयमस्ति दु खस्य समुदय ।

दु'खस्कंधसमुदये समाधीयमाने बोधिसत्त्वस्य उद्पादि ज्ञानं, उद्पादि चक्षु', उद्पादि विद्या, उद्पादि आलोक , उद्पादि ऋद्धि उद्पादि साक्षात्कारः । तस्मिन् काले बोधिसत्त्व पुनरात्मनि समाधात्, यो निशोऽचिन्तयत् कस्य अभावे न जरामरणं, कस्य निरोधाद् जरामरणनिरोध ? तत प्रज्ञयाऽभिसमायात जातेरभावे न जरामरण, जातिनिषेधाद् जरामरणनिरोध , भवस्याभावे न जाति , भवनिरोधाद् जातिनिरोध , उपादानस्याभावे न भव , उपादाननिरोधाद् भवनिरोध , तृष्णाया अभावे न उपादान, तृष्णानिरोधाद उपादाननिरोध । वेदनाया अभावे न तृष्णा, वेदना निरोधात् तृष्णानिरोध' । स्पर्शस्य अभावे न वेदना, स्पर्शनिरोधाद् वेदनानिरोध' । षडायतनस्याभावे न स्पर्श , षडायतननिरोधात् स्पर्शनिरोध । नामरुपस्याभावे न षडायतनं, नामरुपनिरोधात् षडायतननिरोधः । विज्ञानस्याभावे न नामरुप, विज्ञाननिरोधात् नामरुपनिरोधः । सस्कारस्याभावे न विज्ञानं, संस्कारनिरोधाद् विज्ञाननिरोध । अविद्याया अभावे न संस्कार', अविद्यानिरोधात् सस्कारनिरोध । अय अस्ति अविद्यानिरोधात् सस्कारनिरोधः, संस्कार निरोधाद विज्ञाननिरोध ,विज्ञाननिरोधात् नामरुपनिरोध', नामरुपनिरोधात् षडायतन निरोध, षडायतननिरोधात् स्पर्शनिरोध', स्पर्शनिरोधाद वेदनानिरोध , वेदनानिरोधात् तृष्णानिरोध ,तृष्णानिरोधाद उपादाननिरोधः,उपादाननिरोधाद् भवनिरोध ,भवनिरोधाद जातिनिरोध , जातिनिरोधाद् जरामरणशोकपरिदेवदु ख दौर्मनस्यनिरोध' ।

बोधिसत्त्व' समाधात् । दुख'स्कन्धनिरोधकाले उद्पादि ज्ञान, उद्पादि चक्षु', उद्पादि विद्या, उद्पादि आलोक , उद्पादि ऋद्धि , उद्पादि प्रज्ञा, उद्पादि साक्षात्कार ।

तस्मिन् काले बोधिसत्त्वः प्रतिलोमक्रमेण अभिसमायात्, द्वादश हेतुप्रत्ययान् यथाभूत अज्ञासीत यथाभूत ज्ञात्वा तत्रैव तस्मिन् आसने (तेस्य) अभूत् अनुत्तर सम्यक् सबुद्ध' ।

में सूत्रों का क्रम भी एक-सा नहीं है, और न पाठ ही एक-सा है, तो भी यह मालूम होता है, कि पालि दीघनिकाय और सस्कृत दीर्घागम एक ही स्रोत से निकले हैं। शायद पालि-स्रोत अपेक्षाकृत अधिक पुराना या महायान से पहले अठारह बौद्ध सम्प्रदाय (निकाय) भारत में प्रचलित थे, जिसमें एक निकाय की एक शाखा धर्म-गुप्तिक भी थी। सम्भवत बुद्धयश ने उसी के दीर्घागम का यहा अनुवाद किया।

बुद्धयश कावुल (कुभा) के भिक्षु विद्वान् थे, उस समय कावुल सास्कृतिक और धार्मिक तौर से भारत का अभिन्न अंग था। बुद्धयश जन्म ३३८ ई० मे हुआ था, ४०० ई० के आस पास वह चीन मे जा ४००-४१३ ई० के बीच राजधानी छाड्-आन् मे रह कर उन्होंने निम्न चार ग्रन्थों का सस्कृत से चीनी में अनुवाद किया-

१. आकाशगर्भ वोधिसत्व सूत्र	सन० ननजियो सूचीपत्र संख्या	६८
२. दीर्घागम	"	५४५
३ धर्मगुप्त-विनय	"	११९७
४ धर्मगुप्त-प्रातिमोक्ष		

बुद्धयश द्वारा अनुवादित दीर्घागम प्राय तेरह हजार श्लोकों के वरावर है। उसीका दूसरा सूत्र यह "महापरि निर्वाण-सूत्र" है। इस सूत्र के एक से अधिक अनुवाद हुये थे। यह महा परिणिर्वाण सूत्र जहाँ हीनयान त्रिपिटक के दीर्घागम या दीघनिकाय का एक सूत्र है, वहाँ महायान का अपना अलग और वहुत विशाल महापरिनिर्वाण सूत्र भी मौजूद है। आज जिस सम्प्रदाय (निकाय) का एक समय भारत में वहुत प्रचार था, उसका नाम और पिटक दोनों ही विस्मृत हो चुके हैं। लेकिन सौभाग्य से चीनी अनुवाद मे विस्मृत हीनयान "मध्यमागम" (५४२), "एकोत्तरागम" (५४७), "सयुक्तागम" (५४४) और "दीर्घागम" (५४५) चीनी अनुवाद में मौजूद है। इनके अतिरिक्त विनय पिटक और त्रिपिटक के वृहत्भाष्य (विभाषायें) भी मौजूद है, इन ग्रथों से हमारे सास्कृतिक इतिहास पर वहुत प्रकाश पडता है, इसे कहने की आवश्यकता नहीं।

बुद्धयश ने उस समय चीन में जाकर हमारे इस महान् सास्कृतिक काम को किया, जव कि भारत मे गुप्त-वश के सम्राट चन्द्रगुप्त विक्रमादित्य का शासन था और जिस समय कालिदास और दिग्नाग जैसी प्रतिभायें भारत मे अपना

चमत्कार दिखला रही थीं। इन्हीं के समय फाहियान भारत की यात्रा के लिये आया।

दीर्घागम के दो-तीन सूत्रों का अनुवाद आज से बीस वर्ष पहले मैंने किया था। उस समय चीन-भाषा और साहित्य की ओर बढने का मेरा ख्याल था। मेरा ज्ञान उस समय पाँच सौ अक्षरों (शब्द-सकेतों) से अधिक नहीं था, लेकिन उसी समय लका में चीनी विद्वान् वाङ्-मो-लम् मेरे साथ रहते थे हम दोनों आपस में विद्या-विनिमय करते थे। उन्हें बड़ी प्रसन्नता होती, यदि हमारे सयुक्त परिश्रम का फल यह "महापरिणिर्वाण सूत्र" को उन्होंने प्रकाशित देखा होता। थोडे ही दिनों बाद क्षयरोग से घुल-घुल कर मरने की जगह उन्होंने लका के समुद्र मे डूब कर अपना प्राण दे दिया। आज उनके अकृतिम स्वभाव, सौहार्द, विद्या प्रेम और साथ ही जल्दी ही गरम होकर ठडा हो जाना-एक-एक बात की स्मृति दिल में टीस पैदा करती है। चाहे देर से ही हो इस चीनी से हुये सस्कृत के पुनरनुवादका छपना दूसरों को उस कर्त्तव्य की ओर प्रेरणा देगा, जो कि चीनी और तिब्बती भाषा से अपनी विद्या निधियों को भारतीय वेष मे लाने का हमारे सामने है।

—राहुल साकृत्यायन

महापरिनिर्वाण सूत्रम्

एव मया श्रुत-एकस्मिन् समये भगवान राजगृहे विहरति गृध्रकूटपर्वते सार्द्ध सार्धद्वादश शत-भिक्षुण महासघेन।

तेन (खलु) समयेन राजा [illegible]

उपादाय च राज्ञ आज्ञां वर्षकारो महामात्य अभिरुह्य भद्र यानं (रत्नशकट) निरगात् गृध्रकूट पर्वतम् । उपसंक्रम्य तत् स्थान यानात् प्रत्यवरूह्य पदातिक एव यत्र भगवान् तत्र उपसक्रान्त' पृष्ट्वा च अल्पाबाधां.. एक अन्त न्यषीदत् । निषण्णश्च स भगवन्त अवोचत् ....

"राजा मागधोऽजातशत्रु वदते भगवत. (बुद्धस्य) पादौ, अल्पाबाधां बलं प्रांशु विहारं पृच्छति सगौरवं साभिलापम् । वदति च "भन्ते । महर्धिका महाबला महानुभावाश्च वृज्जयः मा नानुवर्त्तन्ते । अहं अभियातुकामइमान् कथं च भगवान् अनुमन्यते ?"

तस्मिन् काले आनन्दोऽपि भगवत पृष्ठतः स्थितो भवति व्यजनमादाय भगवन्त व्यजमान' । भगवान् आमंत्रयामास–

किमिति ते आनन्द । श्रुतं वृज्जय.[1] अभीक्ष्णं सनिपतन्ति, सन्निपत्य· च मिथ सम्पादयति कृत्यम् ?

श्रुत एतद् (भन्ते)–प्रत्यवोचद् आनन्द ।

पुनरपि अवोचद् बुद्ध' "यावदेव एतद् वृद्धिरेव वृज्जीनां नो परिहाणि, तावच्चिर सुरक्षितोऽसौ जनपद न शक्यो ऽभियातु' पराजयाय। (२) किमिति त आनन्द । श्रत वृज्जय न कुर्वते महल्लोकेभ्यो दहरेभ्यश्च भयम् ।

"श्रुतं एतद्"–प्रत्यवोचद् आनन्द' ।

यावदेव आनन्द महल्लका दहरा च समगाः वृद्धिरेव वृज्जीनां नो परिहाणि. तावच्चिर सुरक्षितोऽसौ जनपदः न शक्य अभियातु पराजयाय। (३) किमिति आनन्द । श्रुतवृज्जय' अप्रज्ञप्त धर्म न प्रज्ञापयन्ति प्रज्ञप्त च न समुच्छिन्दन्ति ?"

"श्रुत एतद्"–प्रत्यवोचद् आनन्द

"यावद् एव एतद् आनन्द .....भूयोऽपि वृद्धिरेव वृज्जीनां न परिहाणि, तावच्चिर सुरक्षितोऽसौ देश न शक्य अभियातु पराजयाय। (४) किमिति त आनन्द । श्रुत वृज्जय उपचरन्ति मातापितरौ सत्यकुर्वन्ति मानयन्ति, अनुसरन्ति च आचार्यान् महल्लकान् ?"

---

[1] पालि त्रिपिटका के "दीघनिकाय" का यह सोलहवाँ सूत्र है ।

"तं एतद्"–प्रत्यवोचद् आनन्द ।

(५) किमिति त आनन्द ! श्रुत वृज्जय सत्कुर्वन्ति मानयति चैत्यानि (देवालयान्) देवान् ?"

(६) किमिति तं आनन्द ! श्रुत, वृज्जय यास्ता कुलस्त्रिय परिशुद्धा अमला, ताभि यावत् क्रीडायामपि न प्रहसन्ति मुधा वदन्ति ?

(७) किमिति त आनन्द ! श्रुत वृज्जय उपतिष्ठन्त श्रमणान् मानयन्ति, धर्म्यांश्च रक्षा वरण गुप्ति सविदधति, न कदापि पीडयन्ति ?"

अथ वर्षकारो महामात्य बुद्ध अवोचत् "चेद् एकैकेनापि एतेषा धर्माणा समन्वागतान् जनान्, न शक्य अभियातु, किं पुन सप्तभि धर्मे ।"

अयाचत स अवकाश प्रक्रमाय ।

बुद्धोऽयाचत्—साधु, यस्य त्व काल मन्यसे ।

अथ (खलु) वर्षकार उत्थाय आसनाद् बुद्धस्य त्रि प्रदक्षिणा कृत्वा वदित्वा च प्रक्रान्त

अचिरप्रक्रान्ते च तस्मिन् बुद्ध आनन्द आमन्त्रयामास—"गच्छ त्व आनन्द ! यावत भिक्षव राजगृह उपनिश्रित्य विहरति, तान् सर्वान्, उपस्थानशालाया (धर्मशालाया) सन्निपातय ।

एव (भन्ते) —प्रत्यवोचद् आनन्द ।

अथ स गत्वा राजगृह सगृह्य तान सर्वान भिक्षुन उपस्थानशालाया सन्निपातयामास, अवोचत् च भगवन्त-सन्निपतितो भन्ते ! भिक्षुसघ , यस्य भगवान काल मन्यते ।

अथ भगवान उत्थाय आसनाद् गत्वा उपस्थानशालाया प्रज्ञप्त आसने न्यषीदत् तान भिक्षूश्च आमन्त्रयामास ।

सप्त वो भिक्षव ! अपरिहाणियान धर्मान देशयामि ।

साधु, साधु, सुचिन्तित भगवता, एतस्यैव काल इति ते भिक्षव प्रत्यशृण्वन ।

भगवान एतद अवोचत—तेन शृणुत साधु मनसि कुरुत ।

बुद्ध अवोचत तान भिक्षून—यत इमे अपरिहाणीया धर्मा –(१) प्रथम उच्यते अभीक्ष्ण सन्निपात ,सन्निपाता, सन्नोद्य समुत्थानम् यावत् वृद्धा ... वृद्धाश्च सम्मोद ... न ... धर्म शक्य परिहर्तुम् । (२) द्वितीय उच्यते वृद्धाना

महल्लकानां च परस्परं सम्मोदन, सम्माननं अनुगमनं नानुगमनम्। यावत् च दहरा महल्लका च परस्परं सम्मोदमाना, न अय धर्म शक्य: परिहापयितुम्। (३) तृतीय उच्यते—आचरणं प्रज्ञप्तस्य धर्मस्य न तु अप्रज्ञप्तस्य। यावत् दहराश्च महल्लका च परस्परं सम्मोदमाना, न अयं धर्म शक्य परिहापयितुम्। (४) चतुर्थ उच्यते—ये ते भवन्ति भिक्षव प्रतिवला' सघपितर' प्राज्ञा तान् सर्वे मानयन्ति अनुवर्त्तन्ते। यावत् ०। (५) पचम उच्यते–सवरचित्तचैतसिकाना गौरवं माननं परमम्। यावत् ०। (६) षष्ठ. अपरिहाणीय. धर्म' उच्यते—परिशुद्ध आचरण ब्रह्मचर्यं काम–राग–लोभाना-मननुवर्तनम्। यावत् ०। (७)सप्तम उच्यते—प्रथम अन्ये पश्चात् अह, जातरूपरजतेपु (रूप्यके) अलोभ। यावत् ०।

बुद्ध अवोचत तान् भिक्षून्—पुनश्चापरे ऽपि भवन्ति सप्त अपरिहाणीया. धर्मा— (१) प्रथम –अणुमात्रेपु वस्तुपु, न सौमनस्य नानाभाव, तावद्वृद्धि. एव अस्य धर्मस्य नो परिहाणि। (२) द्वितीय –यत् तस्य सौमनस्यं तूष्णीभावेन संप्रलापाएम'। (३) तृतीय. यदसौ न भवति निद्रा राम. न च कुसीती। (४) चतुर्थ. यद सौ न भवति भेदक. निरर्थक (वस्तु) प्रलपन्। (५) पंचम —यदसौ मुधा (व्यर्थ) न श्लाघते आत्मानम्। (६)षष्ठः—यदसौ न भवति पापसहाय। (७) सप्तम.—यदसौ विहरति पर्वत वन प्रस्थेपु एकाकी। एवं भिक्षव'! वृद्धि भवति धर्मस्य, न परिहाणि।

पुनश्च अवोचत् भगवान्—"भिक्षव'! अपरे च भवन्ति सप्त इमे धर्मा., यै वृद्धि धर्मस्य नो परिहाणि'। कतमे सप्त? (१) प्रथम —यद सौ श्राद्ध भवति, श्रद्धाति तथागतस्य परम सत्यं परमा ..परिपूर्णा बोधि। (२) द्वितीय —यदसौ ह्रीमान् भवति, जानाति आत्ममिथ्यात्वम्। (३) तृतीय —यदसौ अपत्रपी भवति अपत्रपति पापकर्मण। (४) चतुर्थ—यदसौ वहुश्रुत लभते आचरितुं उच्चावाच कुशल सा गभीरं प्रणीत परिशुद्ध विमल परिपूर्णं ब्रह्मचर्यम्। (५) पंचम'—यदसौ आरब्ध वीर्यो भवति प्रधाने, अकुशल विहाय कुशले वीर्य आरमते, न तत् परिज-हाति। (६) पष्ठ —यदसौ स्मृतिं भावयति न च विस्मरति पूर्वं (शिक्षितं) शिक्षा-पदम्। (७) सप्तम —यदसौ विद्या भावयति जानाति च उत्पाद-निरोधं धर्माणा, अनुगच्छति आर्यमूलं सर्वेषा दु'खकारणाना अन्तकरम्। यावद् इमे सप्त धर्मा, वृद्धि एव तावत् न परिहाणि:।"

पुनश्च अवोचत् बुद्ध —"भिक्षव ! अपरेच भवन्ति सप्त धर्मा, यै धर्म वृद्धिरेव भवति विरूढि नो परिहाणि । कतमे सप्त? (१) प्रथम —बुद्धे बहुमानम् । (२) द्वितीय — धर्मे बहुमानम् (३) तृतीय — सघे० । (४) चतुर्थ — शीले० । (५) पचम — समाधौ० । (६) षष्ठ —मातापित्रो सबहुमान अनुवर्त्तनम् । (७) सप्तम — अप्रमादे बहुमानम् एवं इमे सप्तधर्मा, यै वृद्धि एव भवति धर्मस्य नो परिहाणि ।"

पुनश्च अवोचद् बुद्ध —"भिक्षव ! अपरे च भवन्ति सप्त धर्मा यै वृद्धिरे धर्मस्य नो परिहाणि ? (१) प्रथम —भावयति कायेऽशुचिम् । (२) द्वितीय — भावयति भोजनेऽशुचिम् । (३)तृतीय —न अस्य सौमनस्य लोके । (४) चतुर्थ — नित्य अनुस्मरति मृत्युसञ्ज्ञाम् । (५) पचम — उत्पादयति अनित्यसञ्ज्ञाम् । (६) षष्ठ —अनित्ये दु ख-सञ्ज्ञाम, (७) सप्तम —दु खेच अनात्मसञ्ज्ञाम् । इमे तै सप्त धर्मा ।०"

अवोचद् बुद्ध —"भिक्षव ! अपरेच भवन्ति सप्त धर्मा ।०। (१) प्रथम — सबोध्य ग भावयति प्रविविक्ते, काम-राग-लोभेषु अनवलिप्त असस्कृत स्वभाव । (२) द्वितीय —धर्म-विचय सबोध्य ग भावयति । (३) तृतीय —वीर्यसबोध्य ग०। (४) चतुर्थ —प्रीतिसबोध्यग ।० (५) पचम —प्रश्रब्धिसबोध्यग०। (६) षष्ठ — समाधिसम्बोध्यग ।० (७) सप्तम — उपेक्षा (आरक्षा) सबो ध्यग भावयति । इमे तै सप्त धर्मा ।०" अवोचद बुद्ध — "भिक्षव ! भवन्ति षट् अपरिहाणीया धर्मा कतमे षट् ? (१) प्रथम — भिक्षवो मैत्र कायकर्म समुपस्थापयन्ति, न भेद उपस्थापयन्ति सघे । (२) द्वितीय —मैत्र वाक्कर्म प्रत्युपस्थापयन्ति न च परुष वदन्ति । (३) तृतीय —मैत्र मनस्कर्म०, न व्यापादचित्त उपस्थापयन्ति । (४) चतुर्थ —यै तै लाभा परिशुद्धा भोजना न तेषा सर्वेऽ-प्रतिविभक्ताना भोगिनो भवन्ति । (५) पचम — यानि तानि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तानि भावयन्ति, [illegible] [illegible] आर्या [illegible] [illegible] दु खक्षयाय ता च । [illegible] षट् धर्मा ।०।

[illegible] बुद्ध —भिक्षव ! अपरे च भवन्ति षट् अपरिहाणीया धर्मा, [illegible] [illegible] [illegible] एव भवति नो परिहाणि । (१) प्रथम —बुद्ध अनुस्मरति । (२) [illegible] [illegible] [illegible]

पचम —दान। (६) षष्ठ —देवान् अनुस्मरति। इमा षड् अनुस्मृती भावयति। ०। एभि षड्भि धर्मैं समन्वागातस्य वृद्धि भवति नो परिहाणि।

अथ भगवान् राजगृहं यथा भिरक्त विहृत्य आनन्द आमत्रयामास—"सशामय पात्रश्चीवर आयाम आनन्द पाटलिपुत्र नगरम्"

एव (भन्ते)—प्रत्युवाच।

अथ भगवान् निवास्य पात्रश्चीवर आदाय सार्द्धं महता भिक्षु सघेन प्रकान्त मगधेषु अनुपूर्वेण पाटलि ग्राम अवसृत्य पाटलि वृक्ष मूले न्यषीदत् अशृण्वन् (खलु) उपासका —बुद्ध (किल) महता सघेन दूरात् पाटलि ग्राम अनु प्राप्त पाटलि वृक्षस्य मूले निषण्ण।

अथ (खलु) त ग्रामात् निष्क्रम्य दूरत अपश्यन् भगवन्त पाटलि वृक्ष मूले स्थित भासमान अनुतम शान्तेन्द्रिय सुसयत अग्र्य महानागोपम परिशुद्ध विगत रजोमल यथा जल द्वात्रिंशल्लक्षणा शीति व्यजनै समलकृतकायम्। दृष्ट्वा च सौ मनस्यजाता ते यत्र बुद्ध स्थित तत्र गत्वा शिरसा पादौ अभिवाद्य एक मन्त-न्यषीदन्।

अथ खलु भगवान् आनु पूर्व्वेण धर्मं अदिशत् तैभ्य लाभ प्रदर्शयन् श्रुत्वाच बुद्ध भाषित धर्मं ते उपासका बुद्ध अवोचन्—

'इच्छामो भन्ते! गन्तु शरण बुद्धस्य धर्मस्य आर्य सघस्य च, अनु जानातु भगवान् अनुकप उपादाय। उपासका वय अद्यतोऽग्रे प्राणाति पातात् विरता अदत्ता-दानाद् विरता कामेषु मिथ्याचाराद् विरता मृषावादाद् विरता सुरापानाद् विरता शील आचरन्त न तद् विस्मरिष्याम'। अधिवासयतु नो भगवान् सार्द्धं महता भिक्षु सघेन भक्त-दान अवलोकयतु च अनुकप उपादाय।"

अध्यवासीत् च भगवान् तूष्णी भावेन। अथ (खलु) त उपासका उत्थाय आसनाद् बुद्ध अभिवाद्य त्रि प्रदक्षिण कृत्वा चागमन्। तथा गताय आवसथागार समार्ज्य आसनानि प्रज्ञाप्य उदक संस्थाप्य, प्रज्वाल्य गध-प्रदीप आस्तीर्य भद्रासन (रत्नासन) दान सविधाय भगवन्त उपसंक्रम्य ऊचु —

"निष्ठित (सस्कृत) भन्ते! दानं (आवसथागारं) यस्य इदानीं भगवान काल मन्यते"

अथ (खलु) भगवान् उत्थाय आसनाद् विवास्य पात्रचीवर आदाय साध महा सघेन आवसथ उपसक्रान्त पादौ प्रक्षाल्य परिमार्ज्य हस्तौ आसने न्यषीदन्। भिक्षवोऽपि वाम पार्श्वे न्यषीदन्, उपासकाश्च दक्षिण पार्श्वे न्यषीदन्।

अथ भगवान् तान् उपासकान् आमत्रयामास —

पच इमे गृहपतय ! आदिनवो दु शीलस्य शीलविपत्ते । कतमे पच ? (१) प्रथम —लुब्ध चितस्य तृष्णा न परिपूर्यते। द्वितीय —लब्ध भोग प्रतिदिव निगच्छति।"

(३) तृतीय —यामेव परिषद गच्छति न मानितो भवति (४) चतुर्थ — लोके तस्य पापक कीर्ति शब्द अभ्युद्गच्छति (५) पचम —कायस्य भेदात् परम्मरणात् निरये उपपद्यते।

पुनश्च अवोचद् भगवान तान उपासकान—

"पच इमे गृहपतय । आनृशसा शीलवत शील सपभे । कतमे नाम पच ? (१) प्रथम —यथा काम लाभी भवति भोगस्य (कामस्य) (२) द्वितीय —वृद्धिरेव भवति भागस्य नो परिहाणि । (३) तृतीय —यामेव मनुष्य परिषद गच्छति, मानिता भवति मनाप । (४) चतुथ —लोके तस्य कल्याण कीर्ति शब्द अभ्युद्गच्छति (५) पचम —कायस्यभेदात् परम्मरणात् स्वर्गे लोके उपपद्यते।"

अथ भगवान निष्क्रान्त अर्धरात्रे उपासकान अवोचत्=यूय अपि प्रति गच्छत।

अथ त उपासका प्राप्य बुद्धस्य अनुज्ञात्रि प्रदक्षिण कृत्वापादौ अभिवाद्य प्रक्रान्ता।

अथ (खलु) भगवान प्रति सल्लयने स्थित रात्रे पश्चिमे यामे प्रत्यूष समये [illegible] चक्षुषा [illegible] अपश्यत् [illegible] देवता वास्तूनि परिगृह्णाति महेशाख्या देवता [illegible] च वास्तूनि परिगृह्णाति

[illegible] ([illegible]) [illegible] अभ्यक्रम्य प्रज्ञप्ते आसने न्यषीदन्। [illegible]—

[illegible] ([illegible]) [illegible] नगरमापयति ?" आनन्द [illegible] — [illegible] नगर मापयन्त [illegible]

बुद्ध उवाच—"पश्यन आनन्द ! यथा अस्य नगरस्य देवैः सार्धं समत्र्य भवति अह आनन्द ! पश्चिमाया रात्रौ प्रत्यूष समये उत्थाय प्रतिमल्लयनात् दिव्येन चक्षुषा अपश्य सबहुला देवता वास्तूनि परिगृह्णन्ती—महेशाख्या मध्यमा नीचा च परिगृह्णन्ती । यस्मिन् आनन्द ! प्रदेशे महेशाख्या देवता वास्तूनि परिगृह्णन्ति तत्र राज्ञा निवेशनानि सुख समृद्धानि भविष्यति, यत्र मध्यमा देवता वास्तूनि परिगृह्णन्ति तत्र मध्यमाना मनुष्याणा निवेशनानि, यत्र नीचा देवता वास्तूनि परिगृह्णन्ति, तत्र नीचाना मनुष्याणा निवेशनानि भविष्यन्ति । बहु अल्प वा पुण्य प्रत्येक अनु गच्छति । इद आनन्द ! पाटलिपुत्र भविष्यति आर्यं आयतन मनुष्यावास वणिक्-पथ , देश धर्मस्य सत्यस्य आर्जवस्य च । इद अथ नगर सर्वतोऽविनाश्य भविष्यति । अस्य (खलु) आनन्द ! त्रय अन्तराया भविष्यन्ति । प्रथम —महद् उदकम् जलौघ द्वितीय —महाग्नि । तृतीय —अन्तर्-वहिर्धामिथ मनुष्याणा भद ; तदैव विनश्यति इद नगरम् ।

अथ (खलु) पाटलि पुत्रका उपासका तस्या रात्रौ दान (भोजन) प्रतिपाद्य बुद्ध उपसंक्रम्य अवोचन्

"निष्ठित भन्ते ! भक्त , यस्य इदानीं भगवान् काल मन्यते ।" अथ (खलु) पाटलि पुत्रका उपासका स्व हस्तत खादनीयेन परिवारयामासु सतर्पयामासु । निष्ठित भवते जल प्रावार्य अन्यतम नीचं आसनं गृहीत्वा बुद्धस्य पुरत न्यषीदन् ।

अथ भगवान् तान आमत्रयामास -

१ यस्मिन् प्रदेशे कल्पते वास पडित जातिक ।
शीलवतो भोजयन्ति सयतान् ब्रह्मचर्यके ॥
यास्तत्र देवता आसन् कुशला तुष्टिमानसा ।
ता' पूजिता पूजयन्ति मानयति च मानिता

दानेन मैत्र्याच सानुक पचित्ता देवता स्तुता , सदा भवन्ति कुशलेन समन्वागता नोऽकुशलेन ।

अथ भगवान् आदिश्य धर्मं तान् गृहपतीन् उत्थाय आसनात् प्रकान्त सार्धं महता भिक्षु सघेन । तदा वर्षकारश्च महामात्य भवत पृष्ठ अनुबद्धो भवति । तस्य एव

---

१ पाली में यह गाथा रूप में है, किन्तु चीनी में गद्य ।

भवति। "येनाद्यश्रमणा गौतमो नगर द्वारेण निष्क्रमिष्यति, तद् गौतमद्वार नाम भविष्यति येन तीथन गगा नदी तरिष्यति, तद् गौतम तीर्थ नाम भविष्यति।" अथ भगवान् निष्क्रम्य पाटलि पुत्रात् नदी तीर उपसक्रान्त , तस्मिन समये नदीं तीरे सवहुला मनुष्यानाव आरूह्य तरन्ति, केचन उडुप कूल वा समारूह्य नदी तरन्ती। अथ खलु महान सघो यथा वलवान् पुरुप समिंजित बाहु प्रसारयेत् तथा क्षिप्रमगमत् पर तीरम एतदर्थं विदित्वा तस्या वेलाया भगवान् गाथयाऽवोचत—

बुद्धोऽस्तिह्यर्णवे नावचारी दुर्गो नदीं तारयति धर्म सेतु ।
महारथी तस्य रथेन देवा मनुष्या तरन्ति ॥ १ ॥
स्वय छिन्न ग्रंथि तीर्णतट उत्थित आप ।
शमि तान्तरान छिन्न वन्धन निर्वाणं प्रति पद्यते ॥ २ ॥

अथ भगवान वृज्जिपु चरमाण कोटि ग्राम उपसक्रम्य एकस्मिन् वृक्षमूले स्थितोऽवोचत तान भिक्षुन

"चत्वार इमे भिक्षव ! धर्मा गम्भीरा । कतमे चत्वार ? (१) प्रथम — आर्यं शीलम । (२) द्वितीय —आर्या समाधि (३) तृतीय —आर्या प्रज्ञा । (४) चतुर्थ आर्या विमुक्ति । इमे धर्मा गम्भीरा सूक्ष्मा प्रणिता पर्त्तोवा । एपाच भिक्षव ! अनुवोधान दीर्घरात्र सधावित मगत मम च युष्माकच ।"

अथ (खलु) भगवान एत मर्थं विदित्वा गाथा (उदान) उवाच (उदानयामास)
शील समाधि प्रज्ञाच विमुक्तिश्चाप्यनुत्तरा।
इति बुद्धा अभिज्ञाय दुःख स्यान्तकरा गता ॥ ३ ॥

अथ (खलु) भगवान कोटि ग्रामे यथा भिरक्त विहृत्य अवोचत आनन्द—
[illegible] आनन्द [illegible]।

[illegible] भन्ते ! प्रत्युवाच आनन्द ।

[illegible] भगवान [illegible] गत्वा [illegible] भिक्षु [illegible]
[illegible] विहरति।

[illegible] (खलु) [illegible] भगवन्त [illegible] (२) द्वितीय [illegible] (३) तृतीय
[illegible] ([illegible]) ([illegible]) ([illegible]), ([illegible] (६)

षष्ठ पो-य-लु कटिष्यम.), (७) सप्तम पो-तु-लु (भद्र) (८) अष्टम वु-पो-तु (सुभद्र), (६) नवम तुष्ट (तु-लि-सि-तु, (१०) दशम सन्तुष्ट (त्र-यु-लि) (११) एकादश वु-सु (नन्द.), (१२) द्वादश. व-सु-तु-लु (सुदत्त नाम इत्येव-मादय जना इदानीं कालकृता भवन्ति तेषा का गति क सपराय. ? अपरेच सन्ति पचाशत जना, कालंकृता अपरेच पचशत् जना कालकृता, तेषा का गति क सपराय ? " एतत् मनसि कृत्वा उत्थाय प्रति सॅल्लायन स्थानात् उपसक्रम्य भगवत पादौ शिरसा अभिवाद्य एक मन्त न्यषीदत् अवोचत् च भगवन्त —

" प्रति सॅल्लीनस्य मे भन्ते ! मनसि एतद् अभूत—इह नादिका ग्रामे साढ इत्येव मादय—

द्वादश उपासका कालकृता । अपरेच पचाशत जना कालकृता । अपरेच पचशत जना कालकृता तेषा का गति क सम्पराय । व्या करोतु में भन्ते ! अनुकम्पा उपादाय !

बुद्ध उवाच—साढ इत्येवमादय आनन्द ! द्वादश जना छित्वापच अवर-भागीयानि सयोजनानि कालकृता औपपातुका तत्र स्वर्गे परिनिर्वायिन अनावृति धर्माण । अपरेच पचाशद्जना कालकृता त्रयाणा सयोजनाना परिक्षयाद् रागद्वेश मोहानां तनुत्वात् सकृदागमिन सकृदेवइमं लोक आगम्य दु खस्यान्त करिष्यन्ति । सातिरेका पचशतजना नादिकाया कालकृता त्रयाणा सयोजनाना परिक्षयात् स्रोत आपन्ना अविनिपात धर्माण नियता सम्बोधिपरायणा सप्तकृत्व इम लोक आगम्य दु खस्यान्त करिष्यन्ति । अनाश्चर्यं खलु पुन ते एतद् आनन्द ! यत् मनुष्य काल कुर्यात तदा तथागत उपसक्रम्य प्रच्छथ, विहिंसा चैषा स्वय व स्यात् तथा गतस्यच ।"

"सत्य भन्ते । एवमेतत् " प्रत्युवाच आनन्द ।

बुद्ध उवाच—"तस्मात् ते आनन्द ! धर्मादर्श नाम धर्मपर्याय देक्ष्यामि येन समन्वागता आर्यश्रावका आत्मना एवव्याकुर्यु जाति निरासम् । छित्वातिसृन अकुशल पथान स्रोत आपत्ति तान् लभते, सप्त परम इमलोक आगम्य दु खस्यान्त करिष्यति । शक्नोति च स एव व्याकर्तुम् । तेन आनन्द । अय धर्मादर्श उच्यते । आर्य श्रावक बुद्धे अवेत्य प्रसादेन समन्वागतो भवति श्रद्धधाति बुद्धस्तथागत भगवान् अर्हन् सम्यक सबुद्ध दशगुण सपन्न इति । धर्मे प्रसन्न श्रद्धधाति

स्वाख्यातो धर्मं सां दृष्टि क अकालिक निर्वाणो पनयिक प्रत्यात्म वेदितव्य विज्ञैरिति सघे प्रसन्न श्रद्धाति सु प्रतिपन्न भगवत श्रावक सघ ऋजु प्रतिपन्न न्याय प्रतिपन्न सा मीची प्रतिपन्न' मार्गफल प्रतिपन्न धर्मकाय परिपूर्ण यदि द चत्वारि पुरुष युगानि अष्टौ पुरुष पुद्गला स्रोत आपत्ति प्रतिपन्नक स्रोत आपन्नक, सकृदागामिता प्रतिपन्नक सकृदागामी, अनागामिता प्रतिपन्नक, अनागामी, अर्हत्व प्रतिपन्नक अर्हन। एव तथा गतस्य आर्य सघ आह्वानीय प्राघुणेय पुण्यक्षेत्र लोकस्य आर्य कान्तै शीलै समन्वागत अखडै अच्छिद्रै।

अशवलै अकल्मषै विज्ञप्रशस्तै समाधि सवर्तनिकै। अथ खलु स आनन्द! धर्मादर्श येन आर्य श्रावक जानीयु जाति निवास क्षयण अकुशल पथाना अन्त कृत्वा स्रोत आपन्न, सप्त परमनियत दु खस्यान्त करिष्यति इति व्याकर्तु अल स।"

अथ भगवान नादिकाया यथा भिरक्त विहृत्य आनन्द आमन्त्रयामास—"आयाम आनन्द' वैशाल्या देशे।" "एव" इति।

अथ भगवान निवास्य पात्र चीवर आदाय महता भिक्षु सघेन सार्धं नादि यात वैशाल्या प्रक्रान्त। तत्र एकस्मिन वृक्ष मूले निषण्ण। अश्रुणोत (खलु) आम्रपाली गणिका='बुद्ध श्रावकै सार्धं अनु प्राप्त वैशाल्या एकस्मिन वृक्ष मूले निषण्ण।"

अथ सा भद्र यान अभिरुह्य प्रायासीत् बुद्धस्य मति के प्रणादानार्थम्। दूरत एव अन्तरा (मार्गे) अपश्यन् भगवन्त सम्यगुप्त दर्शन शान्तेन्द्रिय, द्वात्रिंशत् लक्षण परिपूर्णं नक्षत्रेषु चन्द्रमिव। दृष्ट्वा च हृष्ट तुष्टा यानात् प्रत्यवरुह्य पदाति का एव भगवन्त नमस्कृत्य शिरसा पादौ अभिवाद्य एक मन्त न्यषीदत्।

भगवाँश्च अध्यवासयत् तुष्णीभावेन् ।

अथ (खलु) सा तुष्णीभावेन भगवतोऽधिवासन विदित्वा उत्थाय आसनात् शिरसा पादौ अभिवाद्य बुद्धस्य प्रदक्षिण कृत्वा प्रक्राता । अचिरप्रक्रान्ताया तस्या बुद्ध आनन्द आमत्रयामास—''आयाम आनन्द ! सार्धं व तस्या वने ।''

''एव भन्ते ' आनद ।

अथ बुद्ध उत्थाय आमनात् पात्र-चीवर आदाय सहस्र द्विशतपचाशत् परिमितेन भिक्षुसंघेन सार्धं तस्या वन अवासरत् । अशृण्वन् (खलु) वैशालिका लिच्छवय —'''बुद्ध (किल) आम्रपालि वने विहरति ।'' अथ ते भद्राणि याना नि-हरित यान (रथ) हरिताश्व वस्त्र-च्छत्र ध्वज परिवारै सर्वे हरितानी सर्वनीलपीतलौ हिताव-दातानि पचवर्णानि पचशत यानानि रथ-वस्त्र वर्णेपु समानानि अभिरुह्य अगमम् भगवन्त द्रष्टुकामा । अथ (खलु) आम्रपाली बुद्धस्य दशनात् गेहं प्रत्यावर्तन्ती अन्तरा मार्गे क्षिप्र गच्छन्ति रथेन तैपां रथ ध्वज छत्र च प्रतिवर्तयामास । अथ रथिन (लिच्छवय) व्याजहरु—''किन्ते अम्बिके ! वलं यद् मार्गा दूरतो न चरित्वा घढयसि नो रथ ध्वस यसिच ध्वजछत्रम् !

सा प्रत्युवाच—''यथाहि मे आर्या ! बुद्ध निमत्रित. श्वस्तनाय भक्ताय, यामि गेह भक्त उपसम्पादयितु', तस्माद् क्षिप्र गच्छन्ति नाशकव स्थान परिवर्ज्य गन्तुम् ।''

अथ ते उच —दे हि हे आम्रपालि ! एत भक्त प्रथम अस्माभिर्दातव्य, वयन्ते दास्याम शत सहस्र, रजत कार्षापणम् ।''

सा प्रत्युवाच—''प्रथम निमन्त्रितो भगवान् न शक्ता दातुम ''

अथ ते रथिन पुनरूचु —''इतो ऽपि अधिक ते दास्याम षोड़शगुण शतसहस्र सुवर्णकार्पापण, देहि न प्रथमम् ।''

सा उवास—''न दास्यामि, न शक्यं दातु इद निमत्रणम् ।''

अथ ते रथिन ऊचु —''इह ते दास्याम राष्ट्रधनस्य मध्य (अर्ध) भाग देहि न प्रथम निमत्रणम् ।''

सा प्रत्युवाच—स चेत् आर्या सम्पूर्ण राष्ट्रधन दास्यथ, नाह तावद् गृहीष्यामि भगवान् हि विहरति मम उद्याने, प्रथमं मे निमन्त्रित भगवान् निश्चित एतत् न कादपि दास्यामि ।"

अथ (खलु) ते रथिका परस्पर-हस्त चालयन्त उदश्वसन् "जिता वत भो ! एतया दारीकया, वचिता वय प्रथम पुण्यत ।"

अथ ते पुरस्तात् सरलेन पथा प्रायु तस्या उद्याने अपश्यत् खलु भगवान् तानि पचशत रथिकान रथै अश्वै अनेक दशसहस्रै मार्ग परिपूर्य आगच्छत । दृष्ट्वा च भिक्षून् आमन्त्रयामास—

"येष वो भिक्षव उद्याने क्रीड़ारताना महानुभावाना देवाना त्रायास्त्रिंशाना द्रष्टु कामता अवलोकयथ ते सदृशा एते उपसंहरथ भिक्षव ! सयनचित्ताना एतेषा महानुभावताम् कथ भिक्षव । चित्त सयन भवति इह भिक्षु अध्यात्म काये कायानुपश्यी विहरति आतापी सप्रजानन स्मृतिमान न मूढ-स्मृति विनीय लोके अभिध्या दौर्मनस्य बहिर्वा काये कायानुपश्यी विहरति आतापी सप्रजानन स्मृतिमान न मूढस्मृति विनीय लोके अभिध्या दौर्मनस्य, अध्यात्मबहिर्वा कायानुपश्यी आतापी सप्रजानन स्मृतिमान विनीय लोके अभिध्या दौर्मनस्य वेदनाया ० चित्ते ० धर्मेषु धर्मानुपश्यी आतापी सप्रजानन स्मृतिमान ० ।

यथा प्रभास्वर आकाशे प्रभासते । अथ तानि पचरथिकशतानि परिज गृह्य आसनानि बुद्धश्च केवल तत्र सघे प्रभया प्रभासमान ।

तस्मिन् काले तस्या परिषदी पिङ्- कु (पैंग्य) नाम ब्राहमण निषण्णो भवति । अथ स उत्थाय आसनाद् दक्षिणा सविवृत्य दक्षिणजानु पृथिव्या पातयित्वा यत्र भगवान् तत्र अजलि प्रणामप्य गाथागिरभापत—

ईक्ष्वाकु राजा गुणेन लभते कुशल फलम् ।
काये रत्नमुक्तावर्मधारी भगवान् स्वकोत्तर ॥ ४ ॥
ईर्यापथेन चालयन् त्रिसाहस्रीं यथा हिमगिरौ प्रभा ।
यथा फुल्ल पद्मपुष्प मधुगधि सुसूक्ष्मसुन्दरम ॥ ५ ॥
इहापश्य बुद्धस्या प्रभा, सूर्यो यथा प्रथमोदित ।
चद्रो यथा चरति नभसि मेघजालैर्विनिर्मुक्ते ॥ ६ ॥
भगवाश्च एव प्रभया प्रभासते लोके ।
तथागतो पश्यति ज्ञान ज्योतिषा यथान्धकारे पश्यत्युल्कया ॥ ७ ॥
ददाति संघ स्वप्रभया चक्षु नाशयति विचिकित्सा जनस्य ।

अथ पचरथिक शतानि (लिच्छवय) उपश्रुत्य इमा ।
गाथा पैंग्य ब्राह्मण उचु— "पुनरपि वद ।"
अथ पैङ्ग्य पुरस्ताद् बुद्धस्य पुन अन्वभाष्त ।
पचरथिकशतानि च गाथा श्रुत्वा एकैक रत्नपट पैंग्याय प्रादात ।

अथ पैंग्य त रत्नपट तथागताय विसर्जयामास, प्रति जग्राह च बुद्धो अनुकम्पा उपादाय । तस्मिन् काले भगवान् उवाच तान् वैशालिकान् रथिकान्—

'लोके भवति पच रत्नानि सुदुर्लभानि कतमानि पच ? (१) प्रथम सुदुर्लभ तथागतस्य प्रादुर्भावो लोके (२) द्वितीय- तथागतो धर्म दिशति जनेभ्य इद अपि सुदुर्लभ मनुष्याणाम् । (३)तृतीय- तथागतो धर्म दिशति शक्नोति त श्रद्धया ज्ञातु इद अपि दुर्लभ मनुष्याणाम् ॥ ० ॥ (४) चतुर्थम्- तथागतो धर्म दिशति, शक्नोति, त उद्गृहीतुम् ॥ ० ॥ (५) पचम- सम्मुख आगत भय अन्तराय जानाति विपरिण-मयितुम ॥ ० ॥ इमानि पच रत्नानि सुदुर्लभानि लोके ।"

अथ पचशतरथिका श्रुत्वा बुद्धदेशिता देशना आत्तमनम बुद्ध ऊचु- "अधिवासयतु भगवान् श्वस्तन नो भक्त सार्धं सर्वे श्रावकै

बुद्ध उवाच रथिकान्– "प्रागेव वो निमत्रितोऽह प्रतिगृहीत मे आम्रपालि-गणिकाया श्वस्तनम् निमत्रणम् ।"

अथ तानि पचशतरथिका प्रागेव निमत्रितो बुद्धोऽम्रपालिकया इति हस्त चालयन्त परस्पर उचु – "इच्छामो दान दातु तथागताय वचिता स्म प्रथम एव तया गणिकया ।" अथ गणिकया ।" अथ ते उत्थाय आसनाद् बुद्धस्य पादौ अभिवाद्य त्रि प्रदक्षिण कृत्वा प्रतिनिवृत्ता ।

अथ (खलु) आम्र पाली गणिका तस्या रात्रौ विविध दान (भोजन) सपाद्य द्वितीयस्मिन् दिने उपसक्रम्य भगवन्त काल आरोचयामास ।

अथ भगवान् निवास्य पात्र-चीवर आदाय सार्धं सहस्र द्विशत पचाशद्-भिक्षुभि पश्चात् पुरत परिवारित तस्या निमत्रण स्थान उपसक्राम्य आसन उपागृह्णात् ।

अथ आम्रपाली गणिका प्रणीतेन खादनीयेन भगवन्त सतर्पयामास भिक्षुसघ च । भक्ते च निष्ठिते अपनीतपत्रपाणौ च भगवति गणिका सुवर्णभृ गारक समादाय हस्तौ जलेन प्रक्षाल्य उवाच बुद्ध –"अस्या वैशाल्या सर्वेषा उद्याने ममेव प्रणीततरम् । प्रतिगृह्णातु मे इद तथागतोऽनुकपा उपादाय ।"

बुद्ध उवाच गणिका– " देहि इद उद्यान बुद्ध प्रमुखाय चातुर्दिश सघाय तत् कि नि श्रि य ? तथागतस्य यानि भवति उद्यान, वन, कोष्ठक गेह, चीवर पात्र पदवस्तूनि, दात दानानि तानि के नापी मारेण, शक्रेण, ब्रह्मणा महेशाग्न्येन वल देवन न शक्यानि परिगृहीतुम ।

तस्माद् उद्यान (आराम) बुद्ध प्रमुखाय चातुर्दिशाय भिक्षुसघाय प्रदत्तो प्रति गृह्य च तद भगवान अनुकपा उपादाय अरोचत् च गाथया ।

दत्त स्तूपारामाणा दान शीतलस्य फलोद्यानस्य ।

दानकथां, शीलकथा, स्वर्गकथा कामेषु आदिनव अपकार सक्लेशं कुशलस्य प्रधानात्। यदा भगवान् अज्ञासीत तां कल्यचित्तां, मृदुचिता, विनीवरणचित्ता, उदग्रचित्ता, प्रसन्नचित्तां सूक्ष्मनीवरण-स्कध विलयनसुकरचित्ता, अथ बुद्धानां समुत्कर्षिका धर्म-देशना तस्यै अदिशत—दु ख आर्यसत्य, दु खसमुदयः, दु.खनिरोध , दु'खनिर्गमा-पेक्षितम् आर्य सत्यमिति। अथ तद् यथापि नाम शुद्ध कंबल अपगतकालक सम्यगेव रजन प्रतिगृह्णीयात् एवमेव आम्रपालिगणिकाया' तस्मिन् एव आसने विरजं विमल सर्वधर्मेषु धर्मेन्द्रियं धर्मचक्षु उदपादि। अथ सा दृष्टधर्मा प्राप्त धर्मा विदितधर्मा पर्यवगाढधर्मा वैशारद्यप्राप्ता, अपायेऽविनिपातधर्मा अभयप्राप्ता बुद्ध अवोचत्—एषाऽहं बुद्धं शरण गच्छामि, धर्म शरण गच्छामि, सघं शरण गच्छामि, द्वितीय-मपि०, तृतीय मपि बुद्ध शरणं०। उपासिकां नां भगवान् धारयतु अद्यतोऽग्रे पाण्यु-पेतां शरण गतां यावज्जीव प्राणातिपात-दत्तादान काम-मिथ्याचार-मृषावाद-मद्यपान विरताम्।

अथ सा भगवत पच शिलानी लब्ध्वा विरता पूर्वव्यवसायेभ्य क्षीणमला उत्थाय आसनात् बुद्ध अभिवाद्य प्रक्रान्ता।

अथ भगवान् वैशाल्यां यथाभिरक्त विहृत्य आनद आमन्त्रयामास—"आयाम आनद। वेणुवनम्।"

"एवं इति आनन्द प्रत्युवाच।

अथनिवास्य पात्रचीवरमादाय सार्ध तेन संघेन अनुगम्यमान भगवान् प्रक्रान्तो वृज्जिते पु वेणु वने (वेणु ग्राम के)।

अशृणोत खलु विशतयो (१) नाम ब्राह्मण-वृद्धः किल सर्वेन सघेन सार्ध उपसक्रान्तोस्मिन एव वेणुवने। अथ सोऽचिंतयत्—"अय खलु श्रमणोगौतम, तस्य गुण चतुर्दिक्षु श्रूयते दशलक्षण परिपूर्ण। स इम लोकं सदेवकं समारक स ब्रह्मक स श्रमण ब्राह्मणों प्रजा स्वय साक्षात्कृत्य धर्म दिशति आदिकल्याण मध्यकल्यान पर्यवसान कल्याण सार्थं सव्यजनं गभीर केवल परिपूर्ण ब्रह्मचर्य प्रकाशयति साधु खलु पुन तथा रूपाणा अर्हतां दर्शन भवति। अथ स ब्राह्मण यत्र वेणुवन तत्र उपसक्रमत। उपसक्रम्य भगवन्तं अभिवाद्य एकमन्त न्यपीदत्। भगवान् आनुपूर्व्येण तस्मै धर्म अदिशन् सम-दर्शयन् सप्रहर्षयत्। ब्राह्मणश्च हृष्ट तुष्टो भगवन्त न्यमत्रयत्—"अधिवासयतु मे

गृहे भगवान् श्वस्तनाय भक्ताय सार्धं भिक्षुसंघेन ।" अध्यवासयद् बुद्ध तूष्णीभावेन । अथ खलु ब्राह्मणो भगवतोऽधिवासनं विदित्वा उत्थाय आसनाद् भगवन्त अभिवाद्य प्रदक्षिण कृत्वा प्राक्रमत् ।

अथ खलु ब्राह्मण तस्या रात्रो खादनीय भक्त प्रतिपाद्य काल आरोचयामास— "कालो भदन्त ! निष्ठित भक्त यस्येदानीं भगवान (आर्य) काल मन्यते ।"

अथ भगवान् निवास्य पात्र-चीवर आदाय भिक्षु संघेन परिवारित उपसक्रमत् तस्य निवेशन उपादाय आसन च न्यषीदत् । अथ खलु ब्राह्मणो बुद्धप्रमुख भिक्षुसंघ नानाविधेन प्रणीतेन खादनीयेन भोजनीयेन समतर्पयन् । भुक्त भोजने प्रक्षालित पात्रपाणौ (भगवति) अन्यतर नीच आसन गृहीत्वा बुद्धस्य पुरता न्यषीदत् । अथ भगवान त ब्राह्मण गाथाभिरध्यभाषत—

सचेत करोति अन्नपान चीन शयनीयवस्तु ।
ददाति शीलवद्भ्योनरेभ्य तेन लभत महाफलम् ॥ १२ ॥
तस्माद् वपन् कुशल परलोक परिभोगाय ।
पुण्य अस्ति [illegible] सत्त्वाना आरक्षायै ॥ १३ ॥
एतत् अस्ति [illegible] आरक्षणं च निर्भयम् ।
नास्ति [illegible] स्वर्गेषु जायते ॥ १४ ॥

[illegible] (भगवान) उत्थाय आसनात् प्राक्रमत् ।

[illegible] (आनन्द) [illegible] । बुद्ध [illegible] आमन्त्र [illegible] शालायाम् ।"

[illegible]

अथ ते भिक्षव लब्ध्वाऽनुज्ञा प्रक्रान्ता । बुद्ध एव केवल सार्धं आनन्देन ग्रीष्माणा (वर्षाणां) कालेऽवसत् । मध्ये ग्रीष्म बुद्धस्य काये खर आबाध उपागच्छत्, सर्वस्मिन काये बाढा वेदना । अथ खलु भगवत एतद् अभूत्–"अह इदानीं आबाधित सर्वस्मिन काये (मे) बाढा वेदना, श्रावकाश्च इह, न मे खलु एतत् प्रतिरूपयोऽह अनामन्त्र्य उपस्थाकान् अनवलोक्य भिक्षुसघ परिनिर्वायेयम् । यन्नून अह इमा आबाध वीर्येण प्रतिप्रणाम्य जीवित सस्कार अधिष्ठाय विहरेय" इति ।

अथ भगवान् विहारात् निष्क्रम्य प्रच्छायाया न्यषीदत् । अथ आनन्दो दृष्ट्वा बुद्ध उपसक्रम्य एतदवोचत्—।

"दृष्टो मे भदन्त भगवत प्राशु सुख तु स्तोक आहत इव भवति ।" पुनरपि आनन्दोऽवोचत="अपि च मे भन्ते ! मधुरकजात इव कायो, दिशापि न में प्रख्यायन्ते, धर्मा अपि मे न प्रतिभान्ति भगवतो ग्लानतया । अपि च मे भन्ते ! अभूत काचिद् आश्वासमात्र–न तावत भगवान परिनिर्वास्यति । लोकचक्षुर्न निरोत्स्यति महाधर्मोन विनक्ष्यति, यावत् न भगवान् भिक्षुसघ आरभ्य किंचिदेव उदाहरति । " बुद्ध आनन्द उवाच="किं पुन आनन्द भिक्षुसघो मयि प्रत्याशसति ? यस्य पुन आनन्द एवं स्यात अह भिक्षु सघ परिधारयामि इति वा ममोद्देशिको भिक्षुसघ इति वा स नू नं आनन्द भिक्षुसघ आरभ्य किंचिदेव उदाहरेत् । तथागतस्य खलु आनन्द- एव न भवति' अह भिक्षुसघ परिधारयामि । किं आनन्द' तथागतो भिक्षुसघ आरभ्य किंचिदेव उदाहरिष्यति देशित आनन्द ! मयाधर्मो ऽ नतर अवाह्य कृत्वा । नास्ति आनद' ! तथा गतस्य धर्मेषु आचार्यमुष्टि । अह खलु पुन. आनन्द ! एतर्हि जीर्णो वृद्धो महल्लकोऽध्वगतो वयोऽनुप्राप्त आशितिक मे वयो वर्तते । तद् यथाऽपि आनन्द ! जर्जरशकट उपायेन वेधमिश्रकेन याप्यते एवमेव खलु आनन्द । वेधमिश्रकेन मन्ये तथा गतस्य कायो याप्यते । यस्मिन् आनन्द ! समये तथा गत सर्वनिमित्ताना अमनसिकारात् एकत्याना वेदनाना निरोधाद् अनिमित्त चेत समाधि उपसम्पद्य विहरति, प्राशुतर आनन्द ! तस्मिन् समये में कायो भवति । तस्माद् ही आनन्द ! आत्मद्वीपाविहरथ आत्मशरणा अनन्यशरणा धर्म द्वीपा धर्मशरणा अनन्यशरणा । कथ च आनन्द ! भिक्षुरात्मद्वीपो विहरति धर्मद्वीपोऽनन्यद्वीप ? आत्मशरणो ऽ धर्मशरणो नन्यशरण ? आनन्दभिक्षु काये

कायानुपश्यी विहरति। आतापी सम्प्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यदोर्मनस्य वेदनासु ० चित्तेषु ० धर्मेषु धर्मानुपश्यी विहरति ०। एवं खलु आनन्द ! भिक्षुरात्म-द्वीपो ०। ये केचिद् आनन्द ! (भिक्षव) एतर्हि वा मा अत्ययेन आत्मद्वीपा विहरिष्यन्ति अनन्यशरणा धर्म द्वीपा धर्मशरणा अनन्यशरणा भावयितार नमतग्रा मे ते आनन्द ! भिक्षवो भविष्यन्ति ये केचित शिक्षाकामा इति।"

अथ खलु भगवान् अवोचत्="आनन्द ! गच्छाव चापालचैत्य।"

"एवं भन्ते," प्रत्युवाच।

अथ तथागत उत्थायनिवास्य पात्रचीवर आदाय गत्वा एकस्मिन वृक्षमूलेऽवोचत् प्रसारयआनन्द। न्यपीदन पृष्ठ मे ग्लायते, इच्छामि इहस्थातुम्

"एव" इति प्रत्युवाच आनन्द ! अथक्षिप्र स प्रज्ञापयामास निपीदनम, तथागतश्च प्रज्ञप्त आसने न्यपीदन्। अथ आनन्द एक क्षुद्रक निपीदन आस्तीर्य बुद्धस्य पुरत उपाविशन्। बुद्धोऽवोचत्

यस्य कस्यचिद् आनन्द ! चत्वार ऋद्धिपादा भाविता बहुलिकृता परिचिता सुसमारब्धा समाहिता स आकाङ्क्षमाण कल्प वा तिष्ठेत् कल्पावशेष वा। बुद्धस्य खलु आनन्द। चत्वार ऋद्धिपादा भाविता आकाङ्क्षमाण आनन्द ! तथागत कल्प वा तिष्ठेत कल्पावशेप वा बहुजनहिताय बहुजनसुखाय अर्थाय हिताय देव मनुष्याणाम। तस्मिन क्षण आनन्द तुष्णीं अभूत् न प्रत्यवोचत्।

द्वितीयमपि ० तृतीयमपि बुद्धोऽवोचत् "यस्य कस्यचिद् आनन्द ! चत्वार ऋद्धिपादा ००। पुनश्च तुष्णीं अभूत यथा स मारेण पर्युत्थित चित परिहीनो न ज्ञातवान् बुद्ध त्रि निमित्तानि प्रकाशयन् न च स प्रतिवेधितु शक्त। बुद्धस्य वचनम्-

अथ आनन्दो बुद्धस्य अनुज्ञां [illegible] आसनाद् अभिवाद्य बुद्धस्य [illegible] [illegible] विविक्त चिन्तयमान।

स्वक आचार्यकं उदगृह्य आचक्षिष्याति देक्ष्यति प्रज्ञापयिष्यति प्रस्थापयिष्यति विवरिष्यति विभजिष्यंति उत्तानीकरिष्यन्ति उत्पन्न परप्रवाद सह धर्मेण सुनिगृहीत निगृह्य सप्रातिहार्यं धर्मं देक्ष्यति" "एतर्हि खलु पुन भन्ते ! भिक्षवो भगवत श्रावका व्यक्ता०। भाषिता च खलु पुन भन्ते ! भगवता एषा वाचा" न तावद् अह पाप्मन् ! निर्वास्यामी यावत मे भिक्षुण्य न श्राविका ०। ० उपासका न श्रावका ०। ० उपासिका न श्राविका भविष्यन्ति व्यक्ता ०। एतर्हि खलु भन्ते। उपासिका भगवत श्राविका व्यक्ता ० धर्मानुधर्मं प्रतिपन्ना ब्रह्मचर्यं दिशन्ति सर्वेभ्यो देव मनुष्येभ्य सप्रातिहार्यम् ।"

पुनश्च अवोचत मार पाप्मा "एकदा बुद्ध उरूवेलाया नद्या नैरजनाया तीरे अजपाल न्यग्रोध वृक्षमूले विहरति प्रथमाभिसंबुद्ध । तस्मिन् कालेऽहं उपसक्रम्य भगवत सन्तिकेऽवोच ""परिनिर्वातु तथागत, परिनिर्वाणकाल इदानीं क्षिप्र परिनिर्वातु ! तस्मिन् काले तथागतो। मामऽवोचत् तिष्ठ तिष्ठ पाप्मन् ! स्वय अह जानामि काल, तथागत इदानीं न परिनिर्वास्यति, यावत् ०। एतर्हि सम्यक् काल, कथ न परिनिर्वाति ?

एव उक्ते बुद्धो ऽवोचत— "तिष्ट तिष्ट पाप्मन् ! बुद्ध स्वय जानाति काल, न चिरेण एव, इत त्रयाण मासाना अत्ययेन पूर्वोत्पादस्थाने कुशीनगरे शालवने यमक शालयो परिनिर्वास्यति।" अथ मारो ऽचिन्तयत्— "न भवति बुद्धाना ऽमोघ वचन, एतर्हि अवश्य परिनिर्वास्यतीति हृष्टतुष्टो ऽन्तर्धाये च प्रक्रान्त ।

अथ बुद्ध चापाल चैत्ये स्मरन् सम्प्रजानन आयु सस्कारं विससर्ज। तस्मिश्च काले महा भूमी चालो ऽभूत देशे मुनुष्याण न को ऽपि अभीत । हस्तेन चीवर निरास्य बुद्ध प्रादर्शयत् महाज्योति यत्र ज्योतिषि मान्धकारलेश तत्र न कस्यापि अलाभ प्रकाशस्य सर्वे ऽलभन्त द्रष्टु ज्योति । तस्मिन् काले भगवान उदान उदानयाचकार—

सस्कृता सस्कृतयो क्रियया सस्कारमिदानीं अवासृजम् ।
अध्यात्मरत समाहित पक्षी यथा निर्गत ॥ १५ ॥

अथ खलु आर्यस्य आनन्दस्य काये लोमहर्षो जात । स शीघ्र भगवत सतिके उपसक्रम्य शिरसा ऽभिवाद्य पादौ एक मन्त स्थित्वा बुद्ध अवोचत्— "आश्चर्यं भगवन् ! भूमिचाल एतादश । को नु अस्य हेतु (को नु) प्रत्यय ?

बुद्धो ऽ वोचत्— "इह खलु आनन्द ! अष्टौ हेतु प्रत्यया लोके भूमिचालस्य। कतमें ऽ ष्टौ ? (१) इयं पृथिवी उदके प्रतिष्ठिता, उदकं वाते प्रतिष्ठितं वात आकाशस्थो भवति, भवति आकाशश्च महावाते, यदा महावात स्वयं कम्पते, अथ उदकं कम्पते, उदकं कम्पितं सर्वा पृथिवीं कम्पयति। अयं अस्ति प्रथम हेतु प्रत्यय । (२) पुनश्चापर आनन्द ! भिक्षुर्वा भिक्षुणि वा मार्गप्राप्त ऋद्धिमान् चेतोवशित्वप्राप्त देवो वा महानुभाव तस्य च परीत्ता पृथिवीसंज्ञा भाविता भवति अप्रमाणा च अप्रमस्या, स इच्छति आत्मनो बलं संपरीक्षितु तदा सर्वा पृथिवी कम्पते। अयं अस्ति द्वितीय । (३) पुश्चापर आनन्द। बोधिसत्व तुषितात् कायात् च्यवित्वा स्मरन् संप्रजानन् अमूढो मातृकुक्षौ अवक्रमते, तदा पृथिव्या महाकम्पो भवति। अयं अस्ति तृतीय । (४) पुनश्चापर आनन्द ! यदा बोधिसत्व स्मरन् संप्रजानन् अमुढो मातृकुक्षित दक्षिणपार्श्वात् निष्क्रमति, तदा ०। (५) पुनश्चपार आनन्द ! बोधिसत्व प्रथमा अनुत्तरा सम्यक्संबोधि अभिसंबुध्यति, तदा ०। (६) पुनश्चापर आनन्द ! बुद्ध प्रथमाभिसंबुद्ध अनुत्तर धर्मचक्र प्रवर्तयति येनापि मारेण, देवेन श्रमण ब्राह्मणै, सर्वे देवै लोके मनुष्ये वा अप्रवर्त्यं तदा ०। (७) पुनश्चपर आनन्द ! बुद्धो दिष्ट्वा उपसमाप्य स्मरन् संप्रजानन आयु संस्कार जीवित श्रामना अव स जति, तदा, ०। (८) पुनश्चापर यदा आनन्द ! अनवशेषे निर्वाणधातौ च परिनिर्वाति, तदा पृथिव्या महाकम्पो भवति। अयं अस्ति अष्टम हेतुप्रत्यय इमे खलु अष्टौ हेतु प्रत्यया भूमिचालस्य। तस्मिन काले भगवान गाथामिदं समभाषत

द्विपदोत्तमो बोधिसत्व शतपुण्य लक्षण ।
अवक्रमते मातृकुक्षि भूमिकप ०॥२१॥
दश मासान् मातृकुक्षौ शेते पर्यंके नाग इव ।
यदानिष्क्रमते दक्षिण पार्श्वात् भूमिकंप ० ॥२२॥
कौमार्ये यथा बुद्धो निरोध्य सस्कार वधनम् ।
जित्वा सखेय मलभत मार्गं भूमिकप ० ॥२३॥
प्रवर्तयति धर्मचक्र तत्र मृगदावकानने ।
जित्वा मार मार्गबलेन भूमिकंप ० ॥२४॥
बह्मा याचत मारदेवो 'बुद्ध परिनिर्वात्विति' ।
बुद्धोऽवसृजति जीवित भूमिकप ० ॥२५॥
नरोत्तमो महाविनायक शास्तान्तिमभव क्षीणायु ।
दुष्प्रकम्प्यो लभते (यदा) निर्वाण भूमिकंप ० ॥ २६ ॥
शुद्धाभोऽवदत् प्रत्ययान् भूमिकपस्य ह्यष्टधा ।
अय चान्यश्च भवति भूमिकपस्तदा भवेत् ॥ २७ ॥*

अथ खलु बुद्धोऽवोचत्—अष्टौ खलु इमा आनन्द ! परिषद कतमा अष्टौ ? (१) प्रथमा क्षत्रीयपरिषद् (२) द्वितीया ब्राह्मण-परिषद् (३) तरतीया ग्रहपति-परिषद्, (४) चतुर्थी श्रमण-परिषद् (५) पचमी चातुर्महाराजिक परिषद् (६) षष्ठीत्रायस्त्रिश परिषद (७) सप्तमी मार परिषद्, (८) ब्रह्मदेव परिषद् । अभिजानामि खलु पुन अह आनन्द ! क्षत्रियपरिषद उपसक्रान्त तत्रापि मया सन्निपण्णपूर्वं चैव सल्लपितपूर्वञ्च साक्षात् च समापादित पूर्वम् । तत्र यद्दशेक तेषां वर्णो भवति स्वरो भवति तत श्रेष्ठतरा मेव स्वरो भवति । ते स्वागतवचनेन माँ विसर्जयन्ति नचाहं व स्वागवचनेनताम् । ते यथा भाषन्ते, अह च तथा भाषितु शक्नोमि । अह आनन्द ! धर्मयार कथया तान् सम दर्शयं समादपय सप्राहर्षयम् । अथ तेभ्य अन्तर धाम । ते न जानन्ति-"को नु खलु अय देवो वा मनुष्यो वा" इति । एव यावत् पेय्याल-ब्रह्म परिषद उपसक्रान्त असख्येयाम् ०

* (बुद्धभाषिते दीर्घाग द्वितीयो भाग " यहा लिखा है प्रथम सूत्र "महाप्रदान सूत्र" के साथ प्रथम भाग समाप्त हुआ था) ।

अथ भगवान् अवोचत्— "एव सूक्ष्म सुन्दरो दुर्लभो आश्चर्याद्भुतापूर्वो-धर्म । तथागत एव अल अधिगन्तु इम धर्मम् ।

पुनश्चावोचत् बुद्ध –"तथागत आनन्द ! सजानिते वेदनानामुदय स्थितिं निरोधच, सञ्ज्ञाना० स्पर्शाना अय च तथागतस्य आश्चर्याद्-भुता पूर्वो धर्म वेदना च वो भावयितव्या ।"

अथ भगवान् अवोचत्–"आयाव आनन्द ! गधचैत्य–कूटागारशालाया । एव भन्ते ।" तत्र च गत्वा (भगवान्) एकस्मिन् वृक्षमूले प्रज्ञप्त आसने न्यषीदत् ।

Squire fing अप्रमाणौ पुत्रौ वरबोधिश्च संजय ।
समववादक प्रसेन. च राहुल सप्तम ॥ ४२ ॥
इमे ते महर्द्धिका. पुत्रा सर्वे बुद्धकुलोपगा.[4] ।

१ सर्वमित्र इति पा ।
२ उपरि—विजय इति शब्दार्थ ।

विदितधर्मा...दाना , आर्यधर्मे (च) निर्भया ॥ ४३ ॥

"विपश्यि बुद्धस्य पिता बन्धुमान्, क्षत्रिय राजवंश, माता बन्धुमती नाम, राजधानी बन्धुमती नाम नगरी ।"

बुद्धस्तदा गाथयोवाच—

विपश्यिन पिता बन्धु , माता बन्धुमती (तथा) ।
बन्धुमन्नगर तत्र बुद्धो धर्मं समादिशत् ॥ ४४ ॥

"शिखिबुद्धस्य पिताऽरुणो नाम क्षत्रियो राजकुलीन , माता प्रभावती नाम, राजधानी अरुणवती नाम ।"

बुद्धस्तदा ग थयोवाच—

"शिखिनो जनकोऽरुणो माता नाम प्रभावती ।
अरुणवती नगर शीलबलेन परशत्रुजित ॥ ४५ ॥"

"विश्वभू बुद्धस्य पिता सुप्रीतो नाम क्षत्रियो राजवशिक , माता यशोवती नाम, नगर अनुपम नाम ।"

बुद्धस्तदा गाथयोवाच—

"विश्वभू बुद्धजनक सुप्रीत नात्रवशिक ।
माता यशोवती (नाम) नगर नाम (हि)अनूपमम् ॥ ४६ ॥

"क्रकुच्छन्द बुद्धस्य पिता 'मजुशीलो नाम, ब्राह्मवशिक , माता विशाखा नाम, क्षेमो नाम राजाऽनुगतो राजा, क्षेमवती नाम हि नगरम ।

बुद्धस्तदा गाथयोवाच-

मजुशीलो द्विज (जात) विशाखा नाम जननी ।
क्षेमो नाम राजा (च) वसति क्षेमवतीपुरे ॥ ४७ ॥

'कोनागम बुद्धस्य पिता 'महाशीलो नाम ब्राह्मण , माता 'विनया नाम, तदा राजा शुभो नाम स्कन्धार , राज नामत शुभवती नाम नगरम ।"

बुद्धस्तदा गाथयोवाच—

"विजया जननी नाम महाशील द्विजः [1](पिता) ।
शुभो नाम (तदा) राजा वसति शुभवती पुरे ॥ ४८ ॥

"काश्यपबुद्धस्य पिता ब्रह्मशीलो नाम, ब्राह्मणवंशिकः, माता धनवती नाम। तस्मिन् काले [2]किकी नाम राजा (उपस्थाकः) राजधानी वाराणसी नाम नगरम् ।"

बुद्धस्तस्मिन् काले गाथयोवाच—

"माता धनवती नाम ब्रह्मशीलो ([1])द्विजः (पिता) ।
तदा राजा ([2])किकी नाम पुरी वाराणसी (तथा)॥ ४९ ॥

"मम पिता शुद्धोदनो नाम क्षत्रियो राजवंशिकः, माता महामायानाम, राजधानी [3]कपिलवस्तु नाम नगरम् ।

बुद्धस्तदा गाथयोवाच—

"महामायेति जननी पिता शुद्धोदनो [4]नृपः ।
बहु[5]धनजने देशे ताभ्यां जातोऽहं (आत्मजः) ॥ ५० ॥

"इमे ते सन्ति बुद्धाः । (ते) हेतु प्रयत्यतः नाम-गोत्र-कुलानां गत्यायु-स्थानतः कथ अभवन् (इति) इदं श्रुत्वा विज्ञः पुरुषो हेतु प्रत्ययतः च न (भवति) सु प्रीति प्रामोद्यप्राप्तः सुख- सौमनस्य चित्तः ।

तस्मिन् काले भगवान् प्रोवाच तान् भिक्षून्—

अभिलपाम्यहं इदानीं पूर्वनिवासज्ञानं वक्तुं अतीतानां बुद्धानां विषये; इच्छेत यूयं श्रोतुं न (वेति) " ?

---

[1] ब्राह्मण-इति शब्दार्थः ।

[2] पो०रो०पी-इति चीनोच्चारम् ।

[3] कपिलव इति ची० ।

[4] क्षत्रिय ची० ।

[5] बहुधने बहुजने

ते भिक्षव प्रत्यूचु—

"एतस्येव इदानीं काल । सुखेनेच्छाम श्रोतुम् ।"

बुद्ध उवाच तान्—

"साधु ! साधु ! ! भिक्षव ! सुष्ठुमनसि करोथ तद् अह वो विभज्य भाषिष्ये । भिक्षवः ! विज्ञातव्या तेषा बुद्धाना ¹धर्मता । विपश्यी बोधिसत्त्व तुषित देवर-लोकगत् च्युतोऽवाक्रमत् मातृकुक्षौ, दक्षिणपार्श्वत प्रविश्य, सम्प्रजान् अमूढ । तत्र तदा पृथ्वी समकपत, महान्तोऽवभासा प्राकाशन्त, सर्व-लोकधातु अवभासयन्त , यत्र चन्द्रसूर्यो न प्राप्नुत , (तत्) सर्वं स्थान आच्छादयन्त उदारेण अवभासेन । निरय-सत्वा (अपि) एकैकस्यान्योन्य पश्यन्ति, सजानन्ति स्वकीया स्थितिं तदाऽस्मिन् अवभासे । पुनश्चपर-दृश्यन्ते मार-प्रासादा सर्वे देवा शक्रो ब्रह्मा श्रमणा ब्राह्मणा चान्ये सत्त्वा सर्वे आच्छादिता उदारेणावभासेन । सर्वे देवलोका स्वभावतोऽदर्शना अवभासन्ते । बुद्धस्तदा गाथाभ्यामुवाच—

नभस्यालम्बते मेघो भाति विद्युत् अधोदिवि ।
विपश्यी भासयन भासा कुक्षौ चापि समाविशत् ॥ ५१ ॥
सूर्येन्द्वनुपगतमप्यनावृत न प्रभासा ।
कुक्षौ तिष्ठति विशदोऽस्रचित ,इति धर्मता सर्वबुद्धानम् ॥ ५२ ॥

"भिक्षव ! सेवें विज्ञेय सर्वबुद्धाना धर्मता । विपश्यी बोधिसत्व तदा स्मरन् सम्प्रजानन् अमूढो मातृकुक्षौ अवाक्रमन् । चत्वारो देवपुत्रा खड्ग हस्ते गृहीत्वा रक्षति तस्य मातरम् । मनुष्या अमनुष्याश्च न प्रभवन्ति विहिंसितुम् । अयमस्ति शाश्वतो धर्म (धर्मता) ।"

बुद्धस्तदा गाथाभिरुवाच—

चतुर्दिश चत्वारो देवपुत्रा ईश्वरा वशिन ।
देवानामिन्द्रेण शक्रेण प्रेषिता सुरक्षितो बोधिसत्त्व ॥ ५३ ॥
करासिधारिणो नित्य अनिर्गच्छन्तो रक्षन्ति ।
मनुष्या अमनुष्या न हिंसन्ति, इय सर्वेषा बुद्धाना धर्मता ॥ ५४ ॥

देवा अवभासमाना रक्षन्ति, देवकन्या यथा रक्ष्यंते देवेषु ।
सुखसम्पन्ने कुले, इयं सर्वेषां बुद्धानां धर्मता" ॥ ५५ ॥

उवाच च—

"भिक्षवः ! सर्वेषां बुद्धाना धर्मता (एषा)। विपश्यी बोधिसत्त्वं तुषितात् देवलोकात् मातृकुक्षौ विज्ञानं अवाक्रमत स्मरन् संप्रजानन् असंमूढ' । मातुःकाय. (तदा) चेसुरसं स्थितो असंबाधितः; प्रज्ञा वर्द्धते। मातावलोकयंती स्वयं पश्यति गर्भम् । बोधिसत्त्वस्य कायः सर्वेन्द्रियपरिपूर्ण, यथालोहितं सुवर्णचूर्णं मल-रजोविरहितं, चक्षुष्मन्त. पुरुषः तत् तथा पश्यन्ति परिशुद्धे स्फटिके अन्तर्वहि. परिशुद्धं स्वच्छं, सर्वावरण-कलुषविरहितम्। भिक्षवः ! सर्वं इदं अस्ति बुद्धानां धर्मता ।"

तस्मिन् काले भगवान् गाथाभ्या उवाच—

"यथाशुभो वैदुर्यमणि' सूर्यचंद्र प्रभेव स्वयं ।
जातिमान्, (तथा) तिष्ठति मातृकुक्षौ, तस्य माताऽसंवाधा ॥ ५६ ॥
प्रज्ञया भवति वर्द्धमाना, सुवर्णविंवं गर्भं पश्यति ।
माता गर्भिणी सुसुखिनी, इयं बुद्धाना धर्मता ॥ ५७ ॥

बुद्ध उवाच—

"भिक्षव. ! विपश्यिनि बोधिसत्त्वे तुषितात् देवलोकात् च्यवित्वा मातृकुक्षिं अवक्रमति स्मरति सप्रजानति अमूढे, मातुर्मनः न सर्वरागचित्तं, न रागाऽग्निना तत् परिदग्धं (भवति)। इयं अस्ति सर्वबुद्धानां धर्मता ।"

तस्मिन् काले च भगवान् गाथाभ्यां उवाच—

"बोधिसत्त्वे तिष्ठति मातृकुक्षिं देवदेवे पुण्यसयुते ।
तन्मातुश्चित्त शुचि निर्मलं सर्वरागचिन्ता विरहितम् ॥ ५८ ॥
सर्वकामरागेच्छयाऽमलिनमसमुपगतम् ।
नभवति कामाग्निना दह्यमानं, सर्व बुद्धानां माता नित्यं परिशुद्धा ॥५९॥

बुद्ध उवाच—

"भिक्षव ! बुद्धाना धर्मता (एषा)। (यदा) विपश्यी बोधिसत्त्व' प्रथमं तुषित देवलोकात् च्यवित्वाऽवाक्रमत् मातृकुक्षौ स्मरन् संप्रजानन् अमूढः। तस्य माता

समाचरति पंचशीलं, ब्रह्मचर्यं पूर्णं शुद्ध निर्मलम् गृह्णाति। अतिश्रद्धा दयापन्नाऽनुकंपिका सर्वकुशलकारिणी सुखिनी निर्भया । काय विहाय जिवितात् च्यवित्वा उत्पद्यते तुषितेषु देवेषु। इय अस्ति धर्मता ।"

तस्मिन् काले च भगवान् गाथयोवाच—

"समाचरति मानुषे उत्तमे काये वीर्य-शील परिपूर्णा ।
पश्चात् गृह्णाति देवकाय इद प्रत्यया नाम बुद्धमाता ॥ ६० ॥

बुद्ध उवाच—

"भिक्षव ! एषा बुद्धाना धर्मता । विपश्यी बोधिसत्त्व स्वोपपत्तिकाले दक्षिणपार्श्वतो निश्चक्राम । पृथिविकंपोऽभूत्, अवभासेन सर्वं अवभासितम्। प्रथम-गर्भप्रवेशकाले तमोमय स्थान (अपि) न (किमपि) अवभासेन अनाच्छादितम्। एषाऽस्ति धर्मता ।

तस्मिन् काले च भगवान् गाथाभ्या उवाच—

राजपुत्रोपपत्तौ पृथिवी चकंपे महद्भवभासेन न किमप्यनाच्छादितम् ।
अय धातुश्च परोवातु ऊर्ध्वमधश्च सर्वा दिश ॥ ६१ ॥
भासमानो प्रभा ददाति शुद्धेन हेतुना, परिपूर्णो देवकायो ।
प्रशातो भवति शुद्धवाक् उच्यते बोधिसत्त्वो नाम" ॥ ६२ ॥

बुद्ध उवाच—

"भिक्षव ! (एषा) बुद्धाना धर्मता। विपश्यी बोधिसत्त्व तत्र स्वोपपत्तिकाले दक्षिणपार्श्वतो निश्चक्राम स्मरन् सम्प्रजानन् अमूढ । तदा बोधिसत्त्वमाता (अभूत्) हस्ते वृक्षशाखा गृहीत्वाऽनिषण्णाऽनिपन्ना । तदा चत्वारो देवपुत्रा हस्ते गृहीत्वा गच्छन्ति, तत्र मातु पुरस्तात् अस्थु वदमाना-मातु ! देवमात ! इदानीं उत्पन्न आर्यपुत्र, मा भव दुर्मनस्काम । एषाऽस्ति धर्मता । "

तस्मिन् काले च भगवान् गाथयोवाच—

"बुद्धमाता अनिषण्णा (अ-) निपन्ना शीलसम्पन्ना ब्रह्मचर्यचारिणी ।
प्रसवति वर निरुत्तम देवमनुष्ये निषेवित (पुत्रम्)" ॥ ६३ ।

कायः परिशुद्धोऽम्रक्षित मलेन श्लेष्मणा। यथा भवति हिमजन (?)-परिशोधिता प्रभास्वरा मुक्ता श्वेत-कौषेयोपरि निक्षिप्ता न म्रक्षते उभयत' शुद्धत्वात्, बोधिसत्त्वोऽपि गर्भे एवम् । इय अस्ति धर्मता।"

तस्मिन् काले च भगवान् गाथयोवाच—

"यथा शुद्धा प्रभास्वरामुक्ता कौषेये निक्षिप्ताऽम्रक्षिता।
बोधिसत्त्वो गर्भे निष्क्राति काले (तथा) परिशुद्धोऽम्रक्षितः ॥ ६४ ॥

बुद्ध उवाच—

"भिक्षव ! एषा बुद्धाना धर्मता। विपश्यी बोधिसत्त्व तत्र स्त्रोपपत्तिकाले दक्षिणपार्श्वतो निश्चक्राम स्मरन् संप्रजानन् अमूढ। दक्षिणपार्श्वतो निष्क्रम्य भूमौ निपत्त्यागमत् सप्तपदानि। अमनुष्या अग्रहीषु तदा। सर्वतो विलोक्य चतुर्दिशं, उत्थाप्य हस्त च भाषते— ऊर्ध्वं देवात् अधो देवात् अहमेव अस्मि अग्रः, इच्छामि विमोचयितु' सत्त्वान् जाति-जराव्याधि-मरणत। एषा धर्मता।"

तस्मिन् काले भगवान् गाथाभिरुवाच—

"सिंहो यथा गच्छति विलोकयन् सर्वत चतुर्दिशम्।
निपत्त्यभूमौ नरसिंहोऽप्येवं सप्तपदानि अगमत ॥ ६५ ॥
महानागो यथागच्छति विलोकयन् सर्वत' चतुर्दिशम्।
निपत्त्यभूमौ नरनागोऽप्येवं सप्तपदान्यगमत् ॥ ६६ ॥
द्विपदोत्तम उपपत्तिकाले सुख अगमत सप्तपदानि।
विलोक्य चतुर्दिश ननाद-नाशयिष्यामि जाति-मृत्यु-दु'खम् ॥ ६७ ॥
स्व प्रथमोपपत्तिकाले स्वत न उत्तमं (न) उत्तम (न) उत्तमच।
पश्यामि, जातिमृत्युमूलं अयं सर्वान्तिम काय ॥ ६८ ॥

भगवानुवाच—

"भिक्षव ! एषा बुद्धाना धर्मता। विपश्यिनो बोधिसत्त्वस्य स्मरत' सप्रजानतोऽमूढस्य दक्षिणपार्श्वत, निष्क्रातस्य स्त्रोपपत्तिकाले द्वे स्रोतसी प्रादुरभूता, एकं शीतल एक उष्ण, तस्य स्नापनार्थम्। एषा धर्मता।"

तस्मिन् काले भगवान् गाथाभ्यामुवाच—

द्विपदोत्तमस्योपपत्तिकाले स्वयं निश्चक्रमतु स्रोतसी द्वे।
बोधिसत्वोपयोगार्थं सर्वनेत्रमस्नापयत् परिशुद्धम् ॥ ६९ ॥

द्वे स्रोतसी स्वयमुद्भिन्ने, तत्र जलसुपरिशुद्ध निर्मलम् ।
एक उष्ण एक शुद्धशीतल सर्वप्रज्ञ (तत) अस्नापयन् ॥ ७० ॥

प्रथमो राजकुमारो जात (इति) बन्धुमान् राजा नैमित्तिकान् सर्वविद्या-(=मन्त्रा)-चार्यान आमन्त्र्य आज्ञापयाचकार—पश्यत राजकुमारं, बुध्यत तस्य भाग्यं दौर्भाग्य । तदा ते नैमित्तिकाचार्या प्राप्य आज्ञा (तस्मिन्) क्षणे उपसृत्य अवतार्यवस्त्र, अपश्यन् सपूर्णानि लक्षणानि । (अथ) व्याचक्रु वचनं—यस्य भवन्ति इमानि लक्षणानि द्वे एव गती (तस्य) हि युक्ते, निस्सशयम् । सचेत् आगारे वसति राजा भविष्यति चक्रवर्ती चतुर्णा लोकाना, चतुरगसेनासपन्नो करिष्यति सद्धर्मेण राज्य, न अन्यायेन, लोक अनुकपमान, तस्य सप्त रत्नानि (निधय) आगच्छन्ति । (पर) सहस्र पुत्रा शूरा बलिन बाह्यशत्रुजये समर्था । सेना दड अनुपयुज्य पृथिवीं शमेन (शास्ति) । सचेत् अभिनिष्क्रम्य आगारात्, शिक्षते मार्गं, सबुद्धो भविष्यति दशबल परिपूर्ण । तदा ते नैमित्तिका आचार्या राजान एव वचन ऊचु—(महा-) राज! उत्पन्नस्ते पुत्रो द्वात्रिंशल्लक्षण-सहित द्वे गती (अस्य) युक्ते अवश्य निस्सशय । (अय चेत्) आगारे वसति भविष्यति चक्रवर्ती आर्यराजा । स चेत् आगारात् निष्क्रमति अवश्य भविष्यति सबुद्ध दशबलपरिपूर्ण ।"

बुद्धस्तदा गाथाभिरवाच—

"शतपुण्यो राजसुत प्रसूत, निमित्ताचार्या ऊचुरेतत् ।
यथेद भवति ग्रथे, गती द्वे युक्ते निस्सशयम् ॥ ७१ ॥
सचेदय इच्छति गेह (-वास) राजा भविष्यति चक्रवर्ती ।
सप्तरत्नाभा रत्नानि स्वय राजान उपगमिष्यन्ति ॥ ७२ ॥
सत्सुवर्ण (-मय) सहस्रारसपूर्ण, परित सुवर्ण जालबद्ध ।
चक्र उत्पतनसमर्थ सर्वग तस्मात् दिव्यचक्र नामास्ति ॥ ७३ ॥
सुसस्त सप्तस्थानुरक्त ऋज्वो विशालो श्वेतो यथा हिम ।
नाग आकाश उत्पतनसमर्थ द्वितीय नाम हस्तिरत्नम ॥ ७४ ॥

रुपं शब्दः गंधोरस. स्पर्शः न (अस्ति) समोऽस्याः किंचिद् ।
सर्वांगनाना प्रथमा (चसैषा) (इदं) पंचमं रत्नं समुच्यते ॥ ७७ ॥
लभते राजा वैदुर्यरत्नं मुक्ता हरितपाषणं (ged) च सर्वरत्नम् ।
सन्तुष्टश्च लभते (इदं) षष्टं रत्नं समुच्यते ॥ ७८ ॥
राजा चक्रवर्ती यथेच्छति सेना द्रुत (तथा) यात्यायाति ।
राजा चक्रवर्ती यथाद्रुतं इच्छति सेना (-पति.) यात्याति ।
राजेच्छानुसार द्रुत (इद) सप्तमं रत्नं समुच्यते ॥ ७९ ॥
इमानि सप्त रत्नानि यानि चक्रं हस्ती शुद्धश्वेतोऽश्व. (च) ।
वैदुर्यमणि मुक्ता स्त्री (च) सेनापति[1]रत्नं भवति सप्तमम् ॥ ८० ॥
तान् पश्यत्यक्लान्त पचकामगुणान् स्वय भुञ्जमान ।
गज इव खंडित रज्जुवंधनो निष्क्रम्यागारात् भवत्विबुद्ध ॥ ८१ ॥
राज्ञो भवति तादृश पुत्रो द्विपदोत्तम. नर (ोत्तम) ।
तिष्ठति लोके प्रवर्त्य धर्मचक्र मार्गगुणोष्वप्रमादी ॥ ८२ ॥

तस्मिन् काले पिता राजा साग्रहं भूय त्रि पुनः अप्राक्षीत् लक्षणाचार्यान्- "यूय पुनरपि पश्यत कुमारस्य द्वात्रिंशत लक्षणानि । तेषा नामादि किम् ?"

तदासर्वे लक्षणाचार्यो एकवारं विवृत्त्य कुमारस्य वस्त्रं अवादिषु'—

"द्वात्रिंशत् लक्षणानि (इमानि)-प्रथमं-पादःसम सुखकर ,पादतलं सम परिपूर्णं भूमौ सुखगमम् । द्वितीय-पादतल लांछित चक्रेण सहस्रारेण परिपूर्णेन,दीप्यमानमन्योऽन्यम् । तृतीय-हस्त पादागुलयोराज हसस्येव । तुर्थ-चहस्त-पादा मृदुका द्विव्यवस्त्रस्येव पंचमं-हस्तपादागुलयो दीर्घा सूक्ष्मा (=लीना) अप्रतिमा । पष्ठ-पादपार्ष्णिरायता दृश्यतेऽक्लाता । सप्तम-एणिजघऊर्ध्वमध. ऋजु. । अष्टम कु चितनद्ध अस्थि,अस्थि-सधिः अन्योन्य-सयुक्ता अर्गलयोजनस्येव । नवम-कोपावहित वस्ति-गुह्यं अगजातं अश्व (-स्य) इव गुह्यम् । दशमं- स्थितक परिमृशति पाणिना जानुकं उपरि । एकादशम-- एकैकलोमकूप , एकैकानि लोमानि जातानि अस्यलोमानि दक्षिणावर्तानि अजननील-(Ros)-वर्णानि । द्वादशम- केशा दक्षिणावर्तकजाता — सुवर्णवर्णा कुंडलिता । त्रयोदशम- काय सुवर्ण वर्ण., चतुर्दशम- छविः सूक्ष्मा

---

१ परिणायक इति पाल्याम् ।

मृदुका नोपलिप्यते रजोजल्येन। पचदशम–– उभयस्कंध समवर्त सुपरिमडल। षोडश वक्षो भवति स्वस्तिकाक्षरम्। सप्तदश–कायो दीर्घ पुरुष द्विगुण। अष्टादश– सप्तसु स्थानेषु सम-परिपूर्ण। ऊनविंश–कायो दीर्घाऽऽयाम समानो [1]न्यग्रोधवृक्षस्येव। विंश–सिंह–पूर्वांग[2]काय। एकविंश–सम-वक्षो भाग सन्नद्ध सिंहस्येव। द्वाविंश–मुखे चत्वारिंशद्दन्ता। त्रयोविंश–समनद्ध समसम। चतुर्विंश– लग्नदन्तोऽविवर (-दन्त)। पचविंश–शुद्धश्वेता भास्वर-दन्त। षड्विंश–सुपरिशुद्धकठ, यन्नानारस भुक्ते न किमपि अप्राशु। सप्तविंश–प्रभूतजिह्वो वाम दक्षिण कर्णं (जिह्वया) लेढि। अष्टाविंश–स्वच्छ विस्पष्ट-ब्रह्म-स्वर। ऊनत्रिंश– अभिनीलवर्णनेत्र। त्रिंश– वृषभराजस्येव ऊर्ध्वमक्ष उभयतो दीर्घनेत्र। एकत्रिंश–केशा विशाल-स्वच्छा भास्वरा मृदुस्निग्ध सूक्ष्मा एक वितस्ति (?) दीर्घायता, मुक्तास्तदा दक्षिणावर्तो करविकाया शन्मुक्ताया इव। द्वात्रिंश–शीर्षे भवति मांसपुज (–उष्णीषम्)।"

तदा गाथाभिरुवाच वचनम।

सुप्रतिष्ठित मृदुपादो न गते भुवि चिह्नदर्शनम्।
सहस्रार (चक्र) लक्षणालकृत उज्ज्वलवर्णं न किंचित् अपरिपूर्णम् ॥ ८३ ॥
न्यग्रोधवृक्ष इव दीर्घायतमसमम।
तथागतोऽभूतो भवति गोपनीय वस्ति अवगुह्यम ॥ ८४ ॥
मणि सुवर्णभूषितकाय सर्वलक्षणै परस्परमुक्त।
स्वेदमलगतोऽप्येव न (नानु) मलिन ॥ ८५ ॥
दिव्यवर्णोर्जितमृदु स्निग्धच्छत्रेण प्रकृत्याच्छादित।
अप्सरो रक्तसुवर्णकाय, पुष्करिण्या प्रथमनिष्क्रान्त पुष्पमिव ॥ ८६ ॥

राजा तान लक्षणाचार्यान पप्रच्छ। लक्षणाचार्या सर्वे एव ऊचु, प्रभापरि पूर्ण काय ... धारय बोधिसत्त्वस्य लक्षण प्रशशसु —

. . .

पादतले दृश्यते चक्रलक्षण, तत्स्वरो यथा करवी कूजनम् ।
जान्वाकृति' लक्षण संयुता पूर्वकर्मभिर्निर्मिता ॥ ८९ ॥
हस्तःपरिमडलपूर्ण सुंदर' भ्रूमु नेत्रे समुचिते विशाले ।
पुरुषसिंह उत्तमवलानुभावोऽप्रतमः ॥ ९० ॥
तस्य हनुः रथचतुरस्त्र सुंदर सिंहस्येवकल्पते शम्याम् ।
चत्वारिंशद् दंता चतुरस्त्राः समुचिता ससक्ता मध्येऽतन्तरालाः ॥ ९१ ॥
ब्रह्मस्वरोऽनन्यसंगतः प्रत्ययानुगा दूरान्तिकात् आयान्ति ।
समस्थितो न वक्रकाय', हस्ताभ्या परिमृषति जानुम् ॥ ९२ ॥
हस्तःसम-समुचितो मृदु सुलक्षण पूर्णम्य नरोत्तमस्य ।
एकैकच्छिद्रं एक लोमजात, हस्तपादौ जम्ललक्षणौ ॥ ९३ ॥
मासजूट', अभिनीलनेत्र, ऊर्ध्वमधउभयतो नेत्रेंऽजनम् ।
उभौ स्कंधौ समवर्तपूर्णौ, द्वात्रिंशत् लक्षणानि पूर्णानि ॥ ९४ ॥
पादपार्ष्णि नोच्चनीचा, एणीजंघः सुंदरः ऋजु. ।
देवदेव आगत इह गजइव छिन्नरज्जुवंधनः ॥ ९५ ॥
दुःखात् विमोक्तु 'सत्त्वान् जाति-जरा व्याधिमरणस्थानात् ।
तेन करुणा चित्तोनातो वक्ष्यति सत्त्य चतुष्टमम् ॥ ९६ ॥
दिशन् धर्मपदस्यार्थं सत्त्वाना सेवा करोत्यनुत्तमम् " ।

बुद्ध उवाच—भिक्षव ! विपश्यिवोधिसत्त्वस्य उपपत्तिकाले शीतोष्ण-वात वर्षात आरक्षार्थं एव हस्ते श्वेतच्छत्र गृहीत्त्वा देवा आकाशोपरि स्थिता " ।

बुद्धस्तदा गाथयोवाच—

"नरेष्वभूतो भवतीह जातो द्विपदानामुत्तम ॥ ९७ ॥
सर्वे देवा गौरवचित्तयुक्ता उपस्थानं उपास्थु रत्नच्छत्रव्यजनै " ।

तस्मिन् काले पिता राजाऽज्ञात् चतस्रो धात्रीः— प्रथमा क्षीरपायिका, द्वितीया स्नापिका, तृतीया गधलेपिका, चतुर्थी क्रीडापिका । सुखेन सह पोषयंति अप्रमादम् ।

तदा गाथयोवाच—

"क्षीरपायिका करुणा स्नेहसान्विता जातं पुत्रं अथ पोषयन्ति ॥ ९८ ॥
एका क्षीरं पाययति स्नपयत्येका, द्वे गधविलेपिका क्रीडायिके ।

लोके (चा) ऽनुत्तमो गंध (तेन) लिंपति नरोत्तमम् " ॥ ९९ ॥

(यदा) दहरोऽभूत देशजना विलोकयति (त)

अतृप्तभावेन । तदा गाथयोवाच—

वहुजनै मानितो लालित प्रत्यग्रकृत स्वर्णप्रतिमा यथा ।
पुरुषा स्त्रिय सर्वेऽतृप्तदृशा एन विलोकयन्ति ॥१००॥

बाल्यकाले देशजना सर्वे एकत समादाय महार्घं पुष्प इव विलोकयन्ति । तथा गाथयोवाच—

"द्विपदोत्तमस्य जातकाले वहुजनाना मानितो मनाय ।
आदाय सर्वे वारेण धारयन्ति विलोकयन्ति महार्घसुगधपुष्पमिव ॥१०१॥

बोधिसत्त्वो जन्मकाल स्वनेत्र त्रयस्त्रिंशै देवैरिव स्वनेत्र न निमिषति । यस्मात् विगत-निमेष पश्यति, तस्मात् विपश्यी इति नाम प्राप ।

तदा गाथयोवाच—

"देवाना देवो न निमिषति देवा त्रायस्त्रिंशा यथा ।
पश्यन् रूप सम्यक् विपश्यति तस्मात् विपश्यी नाम (उच्यते) ॥ १०२ ॥

बोधिसत्त्वस्य जन्मकाले तस्य स्वर शुद्ध मृदु, गभीर, यथा कलविंक पक्षिस्वर, तदा गाथयोवाच—

हिमगिरिपक्षी यथा निपीय पुष्परस च गायति ।
तस्य द्विपदोत्तमस्याऽपि स्वर (तथा) स्पष्ट " ॥ १०३ ॥

बोधिसत्त्वस्य जन्मकाले (तस्य) दूर विलोकनेऽलं नेत्र एक योजन पश्यति । तदा गाथयोवाच—

शुद्धकर्मविपाकेन प्राप्य दिव्योज्ज्वल उत्तमम् ।
बोधिसत्त्वो (हि) नेत्रेण परिपश्यन्त्येकयोजनम् ॥ १०४ ॥

बोधिसत्त्वस्योत्पत्तिकालात् आयु शनैर्वर्धते, महाधर्मशालाया करोति मार्गे शिक्षा जनानुकम्पक गुणशीलितो दृष्टवन्ता। तदा (बुद्ध) गाथा- निरभाषत-

शिशुभावेऽवसत प्रणीतशालायां अकरोत् मार्गं प्रभवन् स लोकम् ।
पश्यति सर्वान् व्यवहारान् ततो विपश्यी नाम (ऽसौ) ॥ १०५ ॥
विपुल विशाल विशुद्ध प्रज्ञोऽतिगंभीरो यथा समुद्रः ।
हृष्टस्तत्र स कुर्वन् प्रज्ञाविवृद्धिम् ॥ १०६ ॥

तस्मिन् काले बोधिसत्त्व ऐच्छद् बहिर्गन्तु दर्शनार्थाय, अत्रोचत् (च) सारथिः "योजय अश्वं रत्नमये रथे, गच्छामोऽथ चङ्क्रमन्त उद्यानं द्रष्टुम्" भृत्योऽथ त्वरितं उपयोजनं समाप्य प्रत्यावर्त्य अवोचत् "इदानीं यस्य) सम्यक् कालोऽस्ति।" कुमारः तदा रत्न रथं आरूढः तदुद्यानगेहं गच्छन् अन्तरा मार्गेऽपश्यत् एकं जीर्णं पुरुषं गलितवसितदन्तं, वलितमुखं, वक्रकायं दण्डपरायणं दुर्बलं प्रवेपमानं (पथि) गच्छन्तम् (दृष्ट्वा च) कुमारोऽपृच्छद् भृत्यः "कोयं अस्ति पुरुषः?"

स प्रत्युवाच "अयमस्ति जीर्णः मनुष्य ।
पुनः अपृच्छत्-किमिति जरा अस्ति?

प्रत्युवाच-"जीर्णं आयुः जातं निःशेषं आयुः, (अनेन) न बहु जीवितव्यं, तस्मादुच्यत एष जीर्णः।"

पुनरपि कुमारोऽपृच्छत्-"अहमपि भविष्यामि एतस्माद् दुःखादवतीत?
प्रत्युवाच—"आम, जातस्य भवति ध्रुव जरा, न (तां) विना हीना वा प्रणीता ।"

तदा दुःखी दुर्मना कुमार त्वरितमुवाच भृत्यं-"नीयाहि पश्चाद् रथ (मत्) प्रासादम्।"

(अथ कुमारः) तूष्णीं प्रध्यायमानोऽचिन्तयत् 'इद जरादुःख प्राप्स्यते माम्।"
बुद्धस्तदा गाथाभिरध्यभाषत:--
दृष्ट्वा जरा जीवितं समापयिष्यति (इति) दुर्बलस्य दण्डेन गच्छतः ॥
बोधिसत्त्वोऽचिंतयदात्मनि "अह नातीत इमामापदम्" ॥ १०७ ॥

तस्मिन् काले पित्रा राज्ञा पुनरलंकृते प्रासादे सुन्दर्यः कुमार्यः (प्रेषिताः त) प्रसादयितुम। बोधिसत्त्वस्तदा गाथाभिरध्यभाषत -

वर्धयामास पच कामगुणान्, इच्छा न कुर्या निष्क्रमणस्य गेहात्" ।। १०८ ।।
पुनश्च पश्चात् कुमार आज्ञापयामास सारथिं—

"योजयरथ निष्क्रमिष्यामि विहाराय ।"

अथ तस्य मार्गे समगच्छद एको व्याधित पुरुष कायेन शिथिल महोदर कृष्णमुख (स्व-) मूत्रकरीपे शयान । न पुरुषा प्रेक्षते त, (स हि) अतिग्लान मुखतो भापितु न समर्थ । (दृष्ट्वा च त कुमार) पप्रच्छ सारथिं— "कोऽयमस्ति पुरुष ?"

प्रत्युवाच-- "अयमस्ति व्याधित पुरुष ।"
"वद किमिति व्याधित ?"

प्रत्युवाच-- "व्याधित (स) य पीडित दुःखित ।" मरिष्यति न चिरेण, तस्मादुच्यतेऽसौ व्याधित इति ।"

पुनरुवाच-- "कच्चिदहं अपि न अस्मात् दुःखादतीत ?"

प्रत्युवाच— "आम, जातस्य भवति व्याधि, न ता विना हीना वा प्रणीता ।"

तत कुमार उवाच दुर्मना —"एव वदसि चेत् सारथि नीयाहि पश्चाद् रथ प्रासादे तूर्णीम् ।"

(अथ) ध्यायमानोऽचिंतयत्। अय व्याधिनो दुःखी, अहमपि भविष्यामि (तथा)। बोधिसत्त्व [illegible] तदा गाथयाऽभाषत –

अपश्यत न चिर व्याधित नर वर्ण तस्य पीत [illegible] ।
[illegible] [illegible] 'अह च नातीत [illegible] ॥ १०९ ॥

पिता राजा तदा पुनरपृच्छत् सारथिं– कच्चित् विहाराय निष्क्रान्त कुमारो न रमते ? पुनश्चापृच्छत् तस्य कारणम् ।

स चोवाच-" (यान-) ारुढ समगच्छत् व्याधित नरं, तस्मात् न आत्तमन· (तुष्ट·) ।

अथ पिता राजाऽऽत्मनि तूष्णीं अचिन्तयत् । एकदा लक्षणचिंतका व्याचक्रु निष्क्रमिष्यति (कुमार) गेहात् । अथ न सुमना, किमेतद् एवं भविष्यति । पुनरपि करोमि उपायम् । वर्धयामि कन्या, यथा तासा गीतेन प्रसन्न चित्तोऽसौ न निष्क्रमेद गृहात् । अथ पुनरपि अलंकृते प्रासादभवने त प्रसादितु सु दूर्य कुमार्यो नियुक्ता । [१]तदावोधिसत्त्वो गाथयोवाच –

रूप-शब्द-गध-रस-स्प्रष्टव्यान् प्रणीतान् उत्तमान् प्रासादिकान् ।
उपभु क्ते वोधिसत्त्व तथा पूर्वे कृतपुण्यो यस्मात् ॥ ११० ॥

अथ पुनरपि अन्यस्मिन् काले कुमार आज्ञापयत् सारथिं—

"योजय रथ, निर्गमिष्यामि विहाराय ।"

अथास्य मार्गे समापतत एको मृत पुरुष नानावर्णाभि पताकाभि – पुरत पश्चाच्च नीयमान । सवधिन ज्ञातय ग्रामवासिनश्च अतिकरुण क्रंदत परिदेवयन्त नयन्तित वहिर्नगरात् ।

कुमार पुनरपृच्छत्— "कोयमस्ति पुरुष ?"
प्रत्युवाच—"अयमस्ति मृत पुरुष ।"
अपृच्छत्—"कोऽस्ति मृतो नाम ?"

प्रत्युवाच—"मृतोऽसौ निरुद्धो लोके । वात प्रथम, अग्नि पश्चात्, सर्वाणि इन्द्रियाणि त्यजति मृत, अन्यदा कुलात् निर्गमयन्ति । तस्मादुच्यतेऽसौ मृत इति ।"

पुनरपि कुमार पप्रच्छ सारथि—"अह अपि (एव) भविष्यामि, कच्चिद् अनतीतोऽह इमा आपदम् ।"

प्रत्युवाच—"आम, जातस्य हि ध्रुवो मृत्यु न (त विना · भवति हीन प्रणीतो (वा) ।"

तत कुमारः अनात्तमना असुमना उवाच सारथिं—
"नीया हि रथ पश्चात् प्रासाद ।"

---

१ "बुद्ध" इति भाषान्तरे

शात तूष्णीभूतो ऽचिन्तयत् चिन्तयन् स 'अय मृत्युदु ख, अहमपि भवि-ष्यामि (एव) । ' तस्मिन् काले बुद्धोऽप्यभाषत गाथया

प्रथम अपश्यत् नर म्रियमाण, अज्ञासिपत् स पुनर्जायत इति'

तूष्णीं शातोऽचिन्तयत् आत्मनि अहं (अपि) अनतीत इमा आपदमिति ॥ तदा पुनरपृच्छत् पिता राजा सारथिं "कच्चित् न कुमार आप्तमना वहिर्गत ?"

प्रत्युवाच—"नाप्तमना " ।

पुनरपृच्छत् तस्य कारणम्, (स) प्रत्युवाच

—"मार्गे समागात् मृत पुरुष , तस्मान्नाप्तमना ।"

अथ पिता राजा तूष्णीं आत्मनि अचिंतयन एकदा लक्षणाचार्या व्याचक्रु लक्षण कुमारस्य निष्क्रमिष्यति गृहात् । अद्य न सुमना , अह पुनरपि विधास्ये-ऽस्योपायम् । वर्धयाचकार ना कन्या प्रसादयन्तु तस्य चित्तमिति, यथा न निष्क्रमेत् गेहात् ।

अथ पुनरपि अलकारयामास प्रासादभवन, नियोजयामास कन्या त प्रासादयितुम्' बुद्धस्तत्र गाथयोवाच

कौमार्ये भवति सुन्दरीभि कुमारिभि परिवारित ।
पचभोगान भुञ्जमान शक्रो यथा देवेन्द्रोऽसौ ॥ ११७ ॥

अथ अन्येद्यु पुनरालापयन सारथि (कुमार)
—'योजय रथ बहिर्गमनाय ।"

अन्तरामार्गे समागमन अपश्यन चार्गो एक श्रमण परिधाय चीवर

अथ मार्ग सत्य, यस्मात् कुमार प्राव्रजत् पर्यवर्जयत् च राज्य सम्मानपद विशेषत ।"

अथ चतुराशीति सहस्र मनुष्याणा देशस्य गत्वा कुमारस्यान्तिक अयाच्चन्त श्रावका भवितु अगारात् प्रव्रजितु, अनुयोक्तु मार्गे । तदा बुद्धो गाथयाऽभाषत

प्रतिनिवृत्तोऽभ्युपागमत् गभीर धर्ममुत्तमम्

तेश्रुत्वाऽनुजग्मु प्रव्रजितु दूर हि रागम्नेहयवनागारात् रहिता सर्वबधनै ॥ ११३ ॥

अथ कुमारस्तदा यथाविध अन्वजानत । तै सार्धं चरति सर्वत्र ग्रामाद् ग्राम जनपदाद् जनपद सर्वत्र (धर्म) देशयन् । स प्राप्य तत् स्थान न किमपि गौरव (अभिकांक्षितेस्त), मनुष्याश्च, प्रत्यय चतुष्टयेन उपतिष्ठति । बोधिसत्त्वोऽचिन्तयत् 'अह हि परिषदा विहरन् सर्वत्र जनपदे मनुष्यैराकीर्ण, इद न मे प्रतिरुप यन्नु अह विहाय इमा परिषद, प्रविविक्ते स्थाने विहरामि, तत्र मार्गं पूरयिष्यामि वाञ्छितम ।' अथ प्रविविक्ते स्थान एकाकी अन्वयु जत मार्गे, अकरोत् च चिन्ता "(कृच्छ्र बत रे) सत्त्वा अनुकम्पनीया, सदा तम परायणा लब्धा काय सातक भगुर, जायते जीर्यन्ते व्याधिमन्त श्च्यवन्ते, सर्वं दु ख उपपद्यन्ते च्युता इतो जायते तत्र, ततो जायतेऽत्र । एतत्प्रत्ययात् अय दु खस्कन्ध । (एतस्मिन्) ससरमाण सधावमान अनत (कालम्) कदाह मानान्करिष्यामि दु खस्कन्ध, निरुध्येत (मे) जाति-जरा-मरणम । अथ तस्य मनसि अभवत जातिमरण कुत किंप्रत्यय चभवति ? तत प्रज्ञाय अपश्यत् कुत -जातितो भवति जरामरण, जातिरस्ति जराम-

तस्मिन् काले (भगवान्) बुद्धो गाथाभिरध्यभाषत

इदं वचो वोच (द) गणे, शृणुत यूय कुशला ।
अतीतेऽपश्यन् बोधिसत्त्वः पूर्वाश्रुत धर्मम् ॥ ११४ ॥
कस्य प्रत्ययाद जरामरण, कस्य हेतोश्च भवति ।
एवं सम्यग् दृष्ट्वा जानीथ तस्यसमुदयो जातित ॥ ११५ ॥
कस्य प्रत्ययाद् जातिसमुदयः कस्य हेतोश्च भवतीद वस्तु ।
एव मनसि कृत्वा जानीथ, भवाद् जाति समुदय ॥ ११६ ॥
तत्त् उपादान उपादाय पर्यायेण पुन वर्धते ।
तस्मात् तथागता अवदन् 'उपादान अस्ति भवस्य हेतुप्रत्यय ॥ ११७ ॥
गभीरमलाकुशलनिकायो वातो वहति यथा न परिशुद्ध ।
एव उपादानलक्षण-हेतुरेपा जायते तृष्णा ॥ ११८ ॥
ततो वेदना जायते, उपपद्यते दु खसमुदयो यत ।
रागस्य हेतु प्रत्ययाद, सुखदु ख अन्योन्य सगतम् ॥ ११९ ॥
वेदनासमुदय कस्य प्रत्यया हेतु कश्च भवति वेदनाया ।
एव चिंतयित्वाऽज्ञासीद वेदना जायते स्पर्शत ॥ १२० ॥
स्पर्श समुदय कस्य प्रत्ययाद, हेतु कश्च भवति स्पर्शस्य ।
एव चिंतयित्वाऽज्ञासीत् स्पर्श जायते षडायतनत ॥ १२१ ॥
षडायतनसमुदय कस्य प्रत्ययाद, हेतु कश्च भवति षडायतनस्य ।
एव चिंतयित्वाऽज्ञासीत् षडायतन जायते नामरूपत ॥ १२२ ॥
नामरूपसमुदय कस्य प्रत्ययात्, हेतु कश्च भवति नामरूपस्य ।
एव० नामरूप जायते विज्ञानत ॥ १२३ ॥
विज्ञानसमुदय कस्य प्रत्ययात्०
एव० विज्ञान जायते संस्कारत ॥ १२४ ॥
संस्कार समुदय०

तस्माद अनित्यं दुःखं पंडितैरुपच्छेदनात् ॥ १२७ ॥
स चेद अविद्या निरुध्यति तदा न भवति संस्कारः ।
सचे द न भवति संस्कार, न भवति विज्ञानं तदा ॥ १२८ ॥
विज्ञानस्य नित्यरोध चेत्, न भवति नामरूपकम् ॥
नामरूपं निरुद्धंचेत्, न भवति सर्वमायतनम् ॥ १२९ ॥
आयतनाना नित्यरोधे न भवति स्पर्श तदाः ।
स्पर्शस्य नित्यनिरोधे तु न भवति वेदना तदा ॥ १३० ॥
वेदना ।नत्यरोधे तु, न भवति तृष्णा तदा ।
तृष्णा नित्यरोधे तु, न भवति उपादानं तदा ॥ १३१ ॥
उपादान नित्यरोधे तु, न भवति भवस्तदा ।
भव नित्यनिरोधे तु न भवति जातिस्तदा ॥ १३२ ॥
जातेर्नित्यनिरोधे तु, न जरा-व्याधि-दुःखकम् ।
सर्वेषां सर्वथा क्षये, पडितस्तेन उच्यते ॥ १३३ ॥
द्वादश प्रत्यया अतिगभीरा दुर्दशा (च) विज्ञातुम ।
बुद्धा एवालंसंबोद्धुं हेतुरस्ति नास्ति वा ॥ १३४ ॥
आत्मना ज्ञायमाने तु नायतनानि भवंति (हि) ।
गंभीरं हेतुप्रत्ययं दृष्टा नरो न पर स्पृहयत्याचार्यम् ॥ १३५ ॥
शक्त स्कन्ध-धात्वायतने वहिः कामी न रागवान् ।
लाभी सर्वदानाना परिशुद्धं प्रतिफल दायकस्य ॥ १३६ ॥
लब्ध चेत् चतुर्भाणकं लभते तत्र ध्रुव प्रतिवेदनम् ।
शक्तः बंधनग्रंथीनां स्कधाना छेत्तुं अप्रमादत ॥ १३७ ॥
रुप-वेदना-सज्ञा-सस्कार-विज्ञानानि जीर्णपुराण रथो यथा ।
सत्यं इमधर्मं पश्यति चेत् तदा भवति सम्यक् सबुद्धः ॥ १३८ ॥
शकुनो यथा उड्डयते नभे शक्नोति पूर्वं अपर चानुवातम् ।
छित्वा पाशान् बोधिसत्त्वोऽगुरुवस्त्रमिष डयते वातम् ॥ १३९ ॥
विपश्यी तत्रोपशान्तः अभिसमबुध्यत तत्र सर्वधर्मान् ।
जरामरणं किंप्रत्ययो भवति, तत् केन निरुध्यति ॥ १४० ॥
स इदं साक्षतत् कृत्य जात शुद्धनिर्मलप्रज्ञः ।
अज्ञासीत् जरामरणं जातेः, जरामरण निरोधो जाति निरोधतः ॥ १४१ ॥

विपश्यी बुद्धः प्रथमाभिसबुद्ध तस्मिन् काले प्रायेण द्वाभ्या विहाराभ्या वेहरति । मैत्री (:) विहारेण उपेक्षाविहारेण वा, बुद्धस्तदा गाथाभिरध्यभाषत—

तथागतोऽसमसम प्रायेणान्वयु जत द्वियोर्विहारयो ।
मैत्र्याचोपेक्षयाच ऋषिमु क्त पारगत ॥ १४२ ॥
तस्य चित्तमलभत स्वस्य भाव छित्वा सर्वपाशान् ।
आरुह्य शैल पश्यति चतुर्दिश, तस्माद् विपश्यी समुच्यते ॥ १४३ ॥
महाज्ञानालोकेन तमो विनाश्य यथा स्वच्छया आदर्शे ।
लोकस्यानाशयत् मोहान्तराय क्षीण जातिजरामरणदु खम् ॥ १४४ ॥

विपश्यी बुद्ध प्रविविक्ते स्थाने पुनरिद अचिन्तयत 'प्राप्तो मयाऽतिगभीरोऽद्भुतो दुर्ज्ञेयो दुर्दर्शोऽनुत्तरो धर्म प्रहाण निरोध अन्तरायोपशामक पडितैर्वेदनीय न पृथग्जनै लभ्य । यत सत्त्वा नानाविमुक्तिका नानादृष्टिका नानाग्राहिणो नानाशिक्षा ततस्ते नानादृष्टिका । प्रत्येक ते सुखविपयसमन्वागता प्रत्येक ते चर्याचित्ता , तस्मात् ते न ज्ञातु शक्नोति इम अतिगभीर हेतुप्रत्यय, भूयो दुर्ज्ञेय तृष्णा क्षय निर्वाणम् । अह चेत् तेपा देशेय, ते नून न ज्ञास्यति, भविष्यति च मे केवल क्लमथो विहिसा ।' एव चिन्तयित्वा तृष्णीभूतो न उवाद धर्मम् । अथ ब्रह्मा देवराजोऽज्ञासीत् विपश्यितथागतस्य चित्त अचिन्तयत्—

'नश्यति वत रे, अयलोक , विनश्यति वत रे शीघ्र अय लोक । विपश्यी बुद्धो लब्ध्वा गभीर अणु एत धर्म न चेच्छति देशितुम् । (अथ) स यथा बलवान् पुरुष बाहुद्वय सकोचयेत , एव ब्रह्मा स्वब्रह्मलोके तत्र क्षण आगम्यावातिष्ठद् बुद्धस्य समक्ष, शिरसा पादौ वन्दित्वाऽतिष्ठत एक मन्तम । अथ ब्रह्मा देवराजो दक्षिण जानु पृथिव्या स्थापयित्वाऽञ्जलि कृत्वाऽवोचद् बुद्धम्—

'देशयतु भगवान् देशयतु सुगतो धर्मदेशनाम् । सन्ति इदानीं इमे सत्त्वा अल्परजस्का नात्युत्कण्ठिता सर्वस्वचित्ता [illegible] आज्ञातारो भविष्यन्ति [illegible] अनुकरोति [illegible] निरोध , अनुत्तर धर्म, अभिनीय कुशलान् मार्गान् ।"

सूको देशयितुं धर्मम्, अहमित असंख्येय कल्प पूर्वंगत आतापी प्रहितात्माऽप्रमत्तो व्यहरं अनुत्तर (ब्रह्म-) चर्यं, अजाप्यगच्छं दुर्लभमेत धर्मम् । स चेद् वदेय क्रोधनं अन्य सत्व, तभून अनुद्गृहीत भवेत् । (तच्च) भवेत मे क्लमथो विहिंसा । अयं धर्मोऽगुरुद्भुत., लोकतो विप्रतीय । सत्वा कामरता अज्ञा अवाटा, नालं ज्ञातु देशनां (मे) । ब्रह्मराज ! एव पश्यामि अहमत्र सेन तूष्णी, नेच्छामि धर्मं देशितु (इमम्) । "

अथ ब्रह्मा देवराजा पुनर्यमाचे हृदयात् प्रार्थयन् सकरुण यावत् तृतीय- "सचेद् भगवान् न दिशति धर्मं, नश्यति वतरे ! अय लोक , कृच्छ्रं वत रे नेच्छति भगवान् अकाले देशयितुम् । अथ सत्वाऽधोगमिष्यति अपरांगतिम् । "

तदा भगवान श्रत्वाऽभिप्रार्थयमानस्य ब्रह्मराजस्य त्रि याचना, अथ बुद्धच- क्षुणाऽपश्यत् लोके-सत्वा समन्वागताः क्लेशेन स्थूलेन अणुना, तीक्ष्णमदेन्द्रिया सुखेनदु खेन वा विनेया । सुखविनेया ये विभ्यति परलोकाद् । तस्मादल निरोधयितु अकुशलधर्मं उत्पन्न कुशलगतिका । यथा (पुन) उत्पलिन्य पद्मिन्यो वा कुमु- दिन्य पुण्डरीकिण्ये (वा सरसि) भवति मलिने पके जायमानाः । (तत्रैकत्या) न यावद् जल, अन्या तिष्ठति अत्युद्गम्य जलालेन सार्द्र[1] , अन्या वा भवति बहिर्ज- लाद् । नोत्फुल्ला अपि सर्वा जलेन अनुपलिप्ता, सुखेन विकासनीया , सत्वा अपि लोक एवम् । "

अथवा भगवान् उवाचब्रह्मराज—"अनुकपा उपादयते देशयिष्यामि इदानीं अमृतधर्मद्वार, धर्ममित्र गभीरं अद्भुत दुर्विज्ञेयम । इदानीं ये श्राद्धा , प्रसन्ना , तेपा देशयामि, न तु विवदमानना उपद्रुतानाम् । अनुपकारक तेभ्यो देशनम् । "

अथ ब्रह्मराजो बुद्धेनोपगृहीता प्रार्थनाम इति संतुष्ट उत्थाय प्रदक्षिणा कृत्या बुद्धस्य पादौ त्रिवार शिरसा वन्दित्वा तत्क्षण अन्तरधात् । अचिर प्रक्रान्ते तस्मिन् अथ तथागत' तूष्णी आत्मन्य चिन्तयन्'-कं प्रथम देशयं धर्मम्' । अथा- चिन्तयदात्मनि 'प्रतिपसतश्च बधुमती नगरे कुमारो यश ' महामात्यपुत्र तिस्यश्च । ताभ्यां विवृणुया अमृतधर्मद्वारम ।'

---

१ सद इति पाठ्याम्

अथ भगवान यथा वलवान पुरुष समिजेत विर्भिजेतवा (प्रसारित) वाहु , तथा हि तत्वेण मार्ग वृचे [1] अन्तर्धाय यत्र वधुमती नगरे वधु (मठो) राज्ञो मृग-दाववने प्रज्ञप्त आसने न्यषीदत्। अथ वद्धो गायथाऽ भाषत—

सिंहो यथा स्मच्छन्द परिक्रमते वने ।
एव बुद्धोऽपि परिक्रमतेऽव्याइतगाति ॥ १४५ ॥

(अथ) विपश्यी बुद्ध आमत्रते स्त्र उद्यानपाल— "प्रविश्य नगर वद राजपुत्र यशास (खड) महामात्य पुत्र तिष्य[2] च कच्चित् न जानाति (भवान) निपश्यी बुद्ध इदानीं वसति मृगदाववने, इच्छेयु यूय द्रष्टुम्। (यस्य इदानीं) कालो मन्यते (स्वामी) ।

अथ उद्यानपाल आदेश लब्ध्वा यत्र तयोद्वयो पुरुषयो स्थान तत्राऽगमत् , अवोचच्च वुद्धस्यादेशम। तन्छ्रु त्वा उभौ उपमक्तातौ बुद्धस्य स्थानम। (उपसक्र म्य च) शिरसा वदित्वा (बुद्धस्य) पादौ एकमत्त न्यषीदताम। तयोर्बु द्धोऽऽनुपूर्व्येण धर्मं प्रकाशयामास सुखेन उद्भाहयित , तद यथा दानकथा, शीलकथा स्वर्गोपत्तिकथा, कामाना अवकार, सक्लेशस्य ऊर्ध्वास्रव भूम्यत्तरायस्य प्रज्ञाण विनिर्गम अत्यणसु तर परिशुद्ध प्रथमम। यदा भगवान् अपश्यत् तयोरुभयो चित्तावेत्त मृद् उदग्र प्रसन्न हृष्ट सद्धर्मग्रहण समर्थ, अथ ताभ्या देशयामास दु ख आर्यसत्य व्याचकार घोषयाचकार, दु ख समुदयार्यसत्य, दु खनिरो धार्यसत्य, दु खनिरोधगामिनीं प्रतिपद आर्यसत्यच। अथ राजपुत्रस्य यशस तिष्यस्य[3] च महामात्यपुत्रस्य तस्मिन्नेवासने वीतमल विरज परिशुद्ध धर्मचक्षुरुदपादि, तद्यथा शुद्ध वस्त्र सुखेन गृह्णीयाद वर्णम ।

भगवा (तस्मिन्) समये गाथाभिद्ध्यभाषत—

तुष्टचित्त समुत्थाय प्राशंसत तथागतम् ।
विपश्यी भूत्वा बुद्धोऽनुत्तर धर्मचक्रं प्रावर्त्तयत् ॥ १४६ ॥
तोतिराज उपपन्न (?) उपाक्रमत् वंधुपुरीम् ।
यशस्तिष्ययो कृते प्रावर्त्तयत चतु.सत्त्यधर्म चक्रम् ॥ १४७ ॥
अथ लब्ध्वा यशस्तिष्यौ बुद्धस्य देशनाम् ।
परिशुद्धं धर्मचक्रं ब्रह्मचर्यमनुत्तरम् ॥ १४८ ॥
अथ देवा त्रायस्त्रिंश शक्रश्च देवानामिंद्र ।
हृष्टतुष्टा मिथ ऊचु सर्वैर्देवैरश्रु तम् ॥ १४९ ॥
बुद्ध जातो लोके प्रावर्तयद् धर्मचक्रमनुत्तरम् ।
वृद्धि र्देवानां सर्वेषा असुराणा च परिहाणिः ॥ १५० ॥
उत्थाय विश्वश्रावा नाम ऋषिः दु खेज्ञानं लोकतो विराग. ।
सर्वेषु धर्मेष्वात्मस्थित प्रावर्त्तयत्प्रज्ञया धर्मचक्रम् ॥ १५१ ॥
अभावयत् समसमै. धर्मै. अवशिष्ठै चित्तं निर्मलम् ।
परिज्ञातु जाति-मरणान्तरायं प्रावर्त्तयत प्रज्ञया धर्मचक्रम् ॥ १५२ ॥
निरोधाय दु खस्य विरागाय च सर्वदोषाणा
निष्कामो लभत आत्मस्थितिम् ।
राग-लोभ-सौमनस्य वर्जित प्रावर्त्तयत् प्रज्ञया धर्मचक्रम् ॥ १५३ ॥
श्रेष्ठो नराणा सबुद्धो द्विपदामुत्तयो वशी ।
सर्ववन्धिनिर्मुक्त प्रावर्त्तयत् प्रज्ञया धर्मचक्रम् ॥ १५४ ॥
देशयन् कुशल नानाऽऽचार्यक मारशत्रोर्विजेता ।
विगत सर्वैरकुशलै प्रावर्त्तयत् प्रज्ञया धर्मचक्रम् ॥ १५५ ॥
निरास्रवो मारजितो सर्वेन्द्रिये ष्वपरिश्रान्त ।
क्षीणास्रवो विगतमारपाश प्रावर्त्तयत् प्रज्ञया धर्मचक्रम् ॥ १५६ ॥
सचेत् शिक्षेत निश्चिनुयान सर्वान् धर्मान् अनात्मत ।
अयमस्ति धर्मे पूत्तार. प्रावर्त्तयत्० ॥ १५७ ॥
नेच्छति यत आजीवलाभ अपि न याचते यश ।
सत्त्वेषु तेषु करुणायमान प्रावर्त्तयत्० ॥ १५८ ॥

दृष्ट्वा सत्त्वान् दुखान्तरायमग्नान् जराव्याधि-मृत्युभि पीडितान् ।
एताभि तिसृभि दुर्गतिभि प्रावर्त्तयत्० ॥ १५९ ॥
क्षीण रागद्वेषमोह प्रहीणतृष्णा मूल ।
अचलश्च विमुक्तौ प्रावर्त्तयत्० ॥ १६० ॥
आत्मा (हि) जेतु दुर्जयोऽकरोद् जिन आत्मजयम् ।
दु ख जेतु अजयत् मार प्रावर्त्तयत्० ॥ १६१ ॥
अनुत्तर धर्मचक्रमिद बुद्ध एव तदा प्रवर्त्तयितुमलम् ।
सर्वे -देवशत्रुमार-ब्रह्मभि नाल दुष्प्रवर्त्त्यम् ॥ १६२ ॥
सबुद्ध प्रवर्त्तित धर्मचक्र हिताय देव-मनुष्याणाम् ।
एतान् देव-मनुष्यान् शास्ताऽतारयत् परपारम् ॥ १६३ ॥

तदा राजपुत्रो यशो महामात्यपुत्रो मित्-च चापश्यता धर्मं, अलभता फल अमृपाभूत परिपूर्ण अभयम् । अथ तौ ऊचतु बुद्ध एतद वचन— "इच्छाव तथागतस्य सुपरिशुद्धे धर्मविनये ब्रह्मचर्यं चरितम ।"

बुद्ध उवाच— "साधु, एता भिक्षू , मम धर्मे परिशुद्धे आत्मनि स्थितौ चरता (ब्रह्मचर्यं) सम्यग्दु खक्षयाय ।"

तस्मिन काले द्वौ जनौ अलभता उपसपदम् । उपसम्पाद्य तथागतो नचिरेण प्रातुरकरणेन निर्माय त्रीणि वस्तूनि, तद्यथा प्रथम ऋद्धिपाद इति, द्वितीय परचित्त-ज्ञान इति, तृतीय च शिक्षा-शील इति । तदा अलभता अनास्रवा चेतोविमुक्ति अविचिछिन्न प्रसन्नाम् ।

त [illegible] मिन काल व [illegible] मती नगरेऽ [illegible] न महाजन —

'द्वौ जनौ प्रव्रज्य अगारात् शिक्षेते (बोधि-) मार्ग आश्रित्य चीवर परिशुद्ध पान च भाव [illegible] ब्रह्मचर्यम । (अथ [illegible] सर्वे परस्पर ऊचु - अहो [illegible] मार्ग [illegible] चरतु [illegible] लोक [illegible] ।"

सूक्ष्मं प्रणीतं परिशुद्धं अनुत्तरं भावम्। यदा भगवान् अपश्यत् तं महाजनं मृदुचित्तं श्राद्धं प्रसन्न हृष्टतुष्ट भव्यं सद्धर्मलाभाय, अथ तं अदेशयत् दुःखं आर्यं सत्यं संवद्मान. सविभजमान, प्रकाशयत्, व्याकरोच्च दुःख समुदयं आर्यसत्यं, दुःखनिरोधं आर्यसत्य, दुःखनिरोधगामिनी प्रतिपदं आर्यसत्यम्। अथ तत् चतुराशीतिजनसहस्र तस्मिन्नेवासनेऽलभत परिशुद्धं धर्मचक्षुः, तद्यथाऽवदातं वस्त्रं सम्यग् गृह्णीयाद वर्णम्। अपश्यत अलभत च फल पूर्णं अभय अमृषाद्वारेण।

अथ ते ऽवदन् बुद्ध च इद वचन—
"इच्छामो वय तथागतस्य सुपरिशुद्धे धर्मविनये ब्रह्मचर्यं चरितुम्।"

बुद्ध उवाच—"साधु, एप भिक्षव मम धर्मे आत्मस्थिता चरथ (ब्रह्मचर्यं) सम्यग्दु क्षयाय।"

अथ चतुराशीतिजनसहस्र अलभत उपसपदम्। उपसपाद्य च तथागत नचिरेण पर्यपूरयत् भगवत त्रिवस्तुका शिक्षा, तत्र प्रथम उच्यते ऋद्धिपाद, द्वितीय उच्यते परचित्तज्ञानं, तृतीयमुच्यते शिक्षा शीलम। अथ ते ऽलभन्त अनास्रवा चेतोविमुक्ति अविचिकित्स प्रज्ञातां चतुराशीतिसहस्रं जना।

अथ अशृण्वन् वंधुमतीजना।— "बुद्धो (भगवान्) मृगदावे प्रावर्त्तयद अनुत्तर धर्मचक्र केनापि श्रमणेन ब्राह्मणेन देवेन मारेण ब्रह्मणा च अप्रावर्त्यम।"

तदा वधुमतीवासिन उपसचक्रमु. तत स्थानं, यत्र भगवान् स्थित, उपसक्रम्य च शिरसा वदित्वा (भगवत) पादौ एकमन्तं न्यपीदन्। तदा बुद्धो गाथयाऽभाषत—

यथा याचन्ते शरणात् प्रत्रीप्रात शीघ्र कामयन्तो विरोध स्थानम्।
एव जनास्त्रोऽपि शीघ्रं उपजग्मु त तथागतम् ॥ १६४ ॥

अपिचैव, तस्मिन् काले वंधुमत्या अभवत् त्रिशताष्ट चत्वारिंशत् सहस्र महाभिक्षुसघः। यशो भिक्षु भिन्न्वा भिक्षुश्च तस्मिन सघे उद्गम्य आकाशं कायात् निष्कासयामासतु जल अग्नि (यमकप्रातिहार्यं), अदर्शयताच ऋद्धि

तस्मिन् काले तथागत तूष्णीं स्वचित्त उवाच— अस्मिन् नगरे च भवति भिशताष्टचत्वारिंशात्स हस्र महाभिक्षुसघ, यन्तु अह प्रेयेय द्वौ द्वौ प्रत्येक स्थान षष्टे सवत्सरे च प्रत्यावर्त्तन नगरे तेषा, देशयतु च ते परिपूर्ण शीलम्।"

अज्ञासीत् च तथागतस्य चित्त सहापति ब्रह्मा (सि-तु-ब्रह्म-देवो), अथ यथा बलवान् पुरुष सम्मिञ्जित बाहु प्रसारयेत्, तथा तस्माद् देवलोकात् निष्क्रम्य उपाक्रमत् इहात्र भगवत पुर शिरसा वादेत्वा एकमन्त अतिष्ठत् एकमन्त स्थित्वा च उवाच बुद्ध—

"एवमेव भगवन्, अस्मिन् बधुमती नगरे बहुभिक्षुसघ, युक्त सर्वेषा सविभाग सर्वत्र चारिका च क, षटसु सवत्सरेषु प्रत्यावर्त्तन चास्मिन् नगरे। देशयतु परिपूर्ण ब्रह्मचर्य आरक्षिष्यामिच तत्र छिद्र न लाभ गवेषयत्।"

तदा तथागतो देवस्य वचन श्रुत्वा तूष्णीं अन्वज्ञासीत्। दृष्ट्वा तूष्णीं अनुजानन् बुद्धस्य भिक्ष- वा देवो वदित्वा बुद्धस्य पार्श्वे तत्र क्षण अन्तर्धाय ऊर्ध्व देवलोक प्रत्यावर्त्तत।

न चिरेण तस्य गमनात् बुद्धो तान भिक्षून् उवाच—

इदानीं अस्मिन नगर भिक्षुसघो बहु, परितो गच्छत चारिकार्थ, षण्णा सवत्सराणा पश्चात् आगच्छत शील (प्रातिमोक्ष) श्रोतुम्।"

तदा त भिक्षव श्रुत्वा बुद्धस्य वचन पात्र-चीवर आदाय वन्दित्वा च बुद्ध अगमन्। तस्मिन् काले बुद्धो गाथया उवाच—

"परिपूर्णानि षट् संवत्सराणि, प्रत्यावर्त्तध्व प्रातिमोक्ष उद्दष्टुम् ।"

अथ ते भिक्षव प्रतिश्रुत्य देवस्य वचन पात्रचीवर आदाय प्रत्यागमन् बधुमतीनगरे, गताश्च मृगदावे (यत्र) विहरति विपश्यी बुद्ध , शिरसा वन्दित्वा बुद्धस्य पादौ एकमन्त न्यपीदन् । तस्मिन् काले बुद्धो गाथयाऽध्यभाषत—

यथा हत्थी सुविनीत' कामनामनु गच्छति ।
एव सघ (सुविनीत) शिक्षा अनुप्रत्यावर्त्तते ॥ १६६ ॥

तस्मिन् काले तथागतो महत सघस्य पुरत ऊर्ध्वं वाते पर्यंकं आभुज्य न्यषीदत् , अदिशत् च प्रातिमोक्षसूत्र, क्षाति प्रथम अदिशद् बुद्धो निर्वाणं— न भवति केश-श्मश्रुवहारेण मुडोऽथ श्रमण ।

तस्मिन् काले सि-त-बुइ-देव उपागम्य बुद्धस्य नातिदूरे गाथाभिर भाषत स्तोमनवचन—

तथागतो महाप्रज्ञ सूक्ष्माद्भुतकेवलोत्तम ।
सम्यग्भावनापरि पूर्णोऽभवत् सम्यक् सबुद्ध ॥ १६७ ॥
सत्त्वेष्वनुकपया लोके परिपूर्णं मार्गम् ।
चतुर्णां आर्यसत्त्याना श्रावकेभ्य समदिशत ॥ १६८ ॥
दुःख दु खसमुदय च दु खनिरोध-सत्त्य (च) ।
आर्य यष्टागिक मार्ग प्राप्य स्थान सुरक्षितम् ॥ १६६ ॥
विपश्यी बुद्ध प्रादुर्भूय लोके सघमध्ये ।
सूर्यो यथा (स्व) प्रभया प्रभासते ॥ १७० ॥
इमा गाथा उक्त्वा तत्रैवान्तरधात् ।

तस्मिन् काले भगवान् उवाच तान् भिक्षून्—

"मम (एव) स्वचित्तेऽभूत्—पूर्वं एकदा राजगृहे गृध्रकूटपर्वतेऽभूवम् । तदा मम चित्त इद अभूत्—य कोऽपि मम उपस्थान अच्छति त-चु-हि-देव परिवर्ज्य, सचेद जायते देवेषु, न पुनरागमिष्यतीह । पुनरपि भिक्षव , तदा मम चित्त इद अभूत्—इच्छामि अह यावत् देवेषु उपरि गन्तुम् अथ अह यथा बलवान् पुरुष सम्मिजित बाहु प्रसरयेत् (प्रसारित वा समिंजेत् तस्मिन्नेव) काले इतो निर्गम्य प्रादुरभव तेषु देवेषु । अथ ते सर्वे देवा मा दृष्ट्वा आगता तत्र । (आगत्य) च

शिरसा वंदित्वा एकमन्त स्थिता ऊचुश्च इद वचन–'वय सर्वे श्रावका विपश्यिन तथागतस्य, तस्माद् बुद्ध देशनार्थं आगता इह। (अथ) आदिशद बुद्धो हेतु प्रत्यय साधन्त पुन (भविष्यति) शिखी बुद्ध, विश्वभू बुद्ध क्रकुसच, कोनागमनो बुद्ध, काश्यपो बुद्ध, शाक्यमुनि बुद्ध । सर्व इमे भवन्ति शास्तार । अह एतद्दशनार्थं आगत इह । अवदन च ते बुद्धा सहेतु-प्रत्यय साधन्त, जाता (च) अकनिष्ठलोके च एवम् ।

तस्मिन् काले बुद्धो गाथाभिरभापत—

पुरुषो यथा बलवान् बाहु समिंजेत प्रसारयेत् ।
अह अकरव ऋद्धिविध गन्तु अकनिष्ठ देवेषु ॥ १७१ ॥
सप्तमे महास्वर्गे जित्वा उभय मारम् ।
अपश्यन् अनन्ता देवा अवदन कृत्वाऽञ्जलिम् ॥ १७२ ॥
यथा श-तु-त्रून शक्र शास्तारमभ्युगोन् ।
सुलक्षण पुण्य सुदर्शन देवा ॥ १७३ ॥
पद्मपुष्प यथा नोलिप्यत जलेन ।
तथा भगवान् अनास्रवो गत सुदर्शने ॥ १७४ ॥
सूर्यो यथा प्रथम उद्गत परिशुद्धोऽनाविल ।
प्रभाय था शरदिन्दो प्राप्त परममनुत्तम एकम् ॥ १७५ ॥
इमेषु पचस्थावसथेषु सर्वे जायन्ते शुद्धमांग ।
शुद्धचित्ता तत आगत्य न क्लेश प्राप्त वन्ति ते ॥ १७६ ॥
परिशुद्धचित्तमागत्य मत्वा बुद्धस्य शासना ।

ककुसंघस्य पुत्र. (स) सर्वान् परिहाय कामान् ।
शुद्धचित्तोऽगमत् मा पूर्ण चद्र प्रभास्वर ॥ १८१ ॥
कोणा गमनस्य पुत्र' (स) विरज. (च-)ासस्कृत ।
शुद्धचित्तोऽगमत् मा अनुत्तर देव इव चिन्तयन् ॥ १८२ ॥
अशक्नोत् महर्षि प्रथमं ऋद्धिपादम् ।
उपायुंक्तातिबलं चित्त भवितु बुद्धस्य श्रावक ॥ १८४ ॥
शुद्धचित्तस्य संजातो भवितुं बुद्धस्य श्रावक ।
वदित्वा तथागतं अवोचत् पुरुषोत्तमम् ॥ १८५ ॥
प्राप्तो मार्गं इह जन्मनि नाम गोत्र (च) ।
सम्यग्दृष्टिं धर्मं गमीर प्राप्तोऽनुत्तर मार्गम् ॥ १८६ ॥
विविक्तस्थापितो भिक्षवो विगतान्तारजोमला' ।
अकुसीति-वीर्यैरभिण छेत्स्यति (ते) भवपाशम् ॥ १८७ ॥
इमे सन्ति सर्वे बुद्धा साद्यन्त हेतुप्रत्यया: ।
शक्तास्तथागतासो तेन (दिशन्ति) देशवाना ॥ १८८ ॥

बुद्धोऽवोचदिद महानिदानसूत्र, अथ ते भिक्षवः श्रत्वा बुद्धस्य
नस समन्वमोदन्त ॥

॥ (इति) बुद्धभाषिते दीर्घागमसूत्रे प्रथम भाग ॥
